# Naishkarmyasidhi

# નૈષ્કર્મ્યસિદ્ધિઃ

## Document Information

Text title : naiShkarmyasiddhiH

File name : naishk.itx

Category : major_works

Location : doc_z_misc_major_works

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Latest update : December 24, 2013

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# નૈષ્કર્મ્યસિદ્ધિઃ

અથ પ્રથમોઽધ્યાયઃ ।
આબ્રહ્મસ્તમ્બપર્યન્તૈઃ સર્વપ્રાણિભિઃ સર્વપ્રકારસ્યાપિ
દુઃખસ્ય સ્વરસત એવ જિહાસિતત્વાત્તન્નિવૃત્ત્યર્થા
પ્રવૃત્તિરસ્તિ સ્વરસત એવ ।
દુઃખસ્ય ચ દેહોપાદાનૈકહેતુત્વાદ્દેહસ્ય ચ
પૂર્વોપચિતધર્માધર્મમૂલત્વાદનુચ્છિત્તિઃ ।
તયોશ્ચવિહિતપ્રતિષિદ્ધકર્મમૂલત્વાદનિવૃત્તિઃ ।
કર્મણશ્ચ રાગદ્વેષાસ્પદત્વાદ્રાગદ્વેષયોશ્ચ
શોભનાશોભનાધ્યાસનિબન્ધનત્વાદધ્યાસસ્ય
ચાવિચારિતસિદ્ધદ્વૈતવસ્તુનિમિત્તત્વાદ્દ્વૈતસ્ય
ચ શુક્તિકારજતાદિવત્સર્વસ્યાપિ
સ્વતસ્સિદ્ધાદ્વિતીયાત્માનવબોધમાત્રોપાદાનત્વાદવ્યાવૃત્તિઃ ।
અતઃ સર્વાનર્થહેતુરાત્માનવબોધ એવ । સુખસ્ય
ચાનાગમાપાયિનોઽપરતન્ત્રસ્યાત્મસ્વભાવત્વાત્તસ્યાનવબોધઃ
પિધાનમ્ । અતસ્તસ્યાત્યન્તોચ્છિત્તાવશેષપુરુષાર્થપરિ-
સમાપ્તિઃ । અજ્ઞાનનિવૃત્તેશ્ચ સમ્યગ્જ્ઞાનસ્વરૂપલાભ-
માત્રહેતુત્વાત્તદુપાદાનમ્ । અશેષાનર્થહેત્વાત્માનવબોધ-
વિષયસ્ય ચાનાગમિકપ્રત્યક્ષાદિલૌકિકપ્રમાણાવિષયત્વા-
દ્વેદાન્તાગમવાક્યાદેવ સમ્યગ્જ્ઞાનમ્ ।
અતોઽશેષવેદાન્તસારસંગ્રહપ્રકરણમિદમારભ્યતે ।
તત્રાભિલષિતાર્થપ્રચયાય પ્રકરણાર્થસંસૂત્રણાય
ચાયમાદ્યઃ શ્લોકઃ ।
ખાનિલાગ્ન્યબ્ધરિત્ર્યન્તં સ્રક્ફણીવોદ્ધૃતં યતઃ ।
ધ્વાન્તચ્છિદે નમસ્તસ્મૈ હરયે બુદ્ધિસાક્ષિણે ॥ ૧॥

સ્વસમ્પ્રદાયસ્ય ચોદિતપ્રમાણપૂર્વકત્વજ્ઞાપનાય

વિશિષ્ટગુણસમ્બન્ધસંકીર્તનપૂર્વિકા ગુરોર્નમસ્કારક્રિયા ।
અલબ્ધ્વાતિશયં યસ્માદ્વ્યાવૃત્તાસ્તમબાદયઃ ।
ગરીયસે નમસ્તસ્મા અવિદ્યાગ્રન્થિભેદિને ॥ ૨॥

નમસ્કારનિમિત્તસ્વાશયાવિષ્કરણાર્થઃ ।
વેદાન્તોદરસંગૂઢં સંસારોત્સારિ વસ્તુગમ્ ।
જ્ઞાનં વ્યાકૃતમપ્યન્યૈર્વક્ષ્યે ગુર્વનુશિક્ષયા ॥ ૩॥

કિંવિશયં પ્રકરણમિતિ ચેત્તદુપન્યાસઃ ।
યત્સિદ્ધાવિદમઃ સિદ્ધિર્યદસિદ્ધૌ ન કિંચન ।
પ્રત્યગ્ધર્મૈકનિષ્ઠસ્ય યાથાત્મ્યં વક્ષ્યતે સ્ફુટમ્ ॥ ૪॥

વિવક્ષિતપ્રકરણાર્થપ્રરોચનાયાનુક્તદુરુક્તાપ્રામાણ્યકારણ-
શઙ્કાવ્યુદાસેનસ્વગુરોઃ પ્રામાણ્યોપવર્ણનમ્ ।
ગુરૂક્તો વેદરાદ્ધાન્તસ્તત્ર નો વચ્મ્યશક્તિતઃ ।
સહસ્રકિરણવ્યાપ્તે ખદ્યોતઃ કિં પ્રકાશયેત્ ॥ ૫॥

ગુરુણૈવ વેદાર્થસ્ય પરિસમાપિતત્વાત્પ્રકરણોક્તૌ
ખ્યાત્યાદ્યપ્રામાણ્ય-
કારણાશઙ્કેતિ ચેત્તદ્વ્યુદાસાર્થમાહ ।
ન ખ્યાતિલાભપૂજાર્થં ગ્રન્થોઽસ્માભિરુદીર્યતે ।
સ્વબોધપરિશુદ્ધ્યર્થં બ્રહ્મવિન્નિકષાશ્મસુ ॥ ૬॥

અનર્થાનર્થહેતુપુરુષાર્થતદ્ધેતુપ્રકરણાર્થસંગ્રહજ્ઞાપ

-

નાયોપન્યાસઃ । ઐકાત્મ્યાપ્રતિપત્તિર્યા સ્વાત્માનિભવસંશ્રયા ।
સાઽવિદ્યા સંસૃતેર્બીજં તન્નાશો મુક્તિરાત્મનઃ ॥ ૭॥

પુરુષાર્થહેતોરવશિષ્ટત્વાત્તદભિવ્યાહારઃ ।
વેદાવસાનવાક્યોત્થસમ્યગ્જ્ઞાનાશુશુક્ષણિઃ ।
દન્દહીત્યાત્મનો મોહં ન કર્માપ્રતિકૂલતઃ ॥ ૮॥

પ્રતિજ્ઞાતાર્થસંશુદ્ધ્યર્થં પૂર્વપક્ષોક્તિઃ ।
તત્ર જ્ઞાનમભ્યુપગમ્ય તાવદુપન્યાસઃ ।
મુક્તેઃ ક્રિયાભિઃ સિદ્ધત્વાજ્જ્ઞાનં તત્ર કરોતિ કિમ્ ।
કથં ચેચ્છૃણુ તત્સર્વં પ્રણિધાય મનો યથા ॥ ૯॥

અકુર્વતઃ ક્રિયાઃ કામ્યા નિષિદ્ધાસ્ત્યજતસ્તથા ।
નિત્યનૈમિત્તિકં કર્મ વિધિવચ્ચાનુતિષ્ઠતઃ ॥ ૧૦॥

કિમતો ભવતિ ।
કામ્યકર્મફલં તસ્માદ્દેવાદીમં ન ઢૌકતે ।
નિષિદ્ધસ્ય નિરસ્તત્વાન્નારકીં નૈત્યધોજનિમ્ ॥ ૧૧॥

દેહારમ્ભકયોશ્ચ ધર્માધર્મયોર્જ્ઞાનિના સહ કર્મિણઃ
સમાનૌ ચોદ્યપરિહારૌ ।
વર્તમાનમિદં યાભ્યાં શરીરં સુખદુઃખદમ્ ।
આરબ્ધં પુણ્યપાપાભ્યાં ભોગાદેવ તયોઃ ક્ષયઃ ॥ ૧૨॥

કામ્યપ્રતિષિદ્ધકર્મફલત્વાત્સંસારસ્ય
તન્નિરાસેનૈવાશેષાનર્થનિરાસસ્ય સિદ્ધત્વાત્કિં
નિત્યાનુષ્ઠાનેનેતિ ચેત્તન્ન । તદકરણાદપ્યનર્થપ્રસક્તેઃ ।
નિત્યાનુષ્ઠાનતશ્ચૈનં પ્રત્યવાયો ન સંસ્પૃશેત્ ।
અનાદૃત્યાત્મવિજ્ઞાનમતઃ કર્માણિ સંશ્રયેત્ ॥ ૧૩॥

અભ્યુપેત્યૈવમુચ્યતે ન તુ યથાવસ્થિતાત્મવસ્તુવિષયં
જ્ઞાનમસ્તિ । તત્પ્રતિપાદકપ્રમાણાભાવાત્ ।
યાવન્ત્યશ્ચેહ વિદ્યન્તે શ્રુતયસ્સ્મૃતિભિસ્સહ ।
વિદધત્યુરુયત્નેન કર્માતો ભૂરિસાધનમ્ ॥ ૧૪॥

સ્યાત્પ્રમાણસમ્ભવો ભવદપરાધાદિતિ ચેત્તન્ન । યતઃ ।
યત્નતો વીક્ષમાણોઽપિ વિધિં જ્ઞાનસ્ય ન ક્વચિત્ ।
શ્રુતૌ સ્મૃતૌ વા પશ્યામિ વિશ્વાસો નાન્યતોઽસ્તિ નઃ ॥ ૧૫॥

સ્યાત્પ્રવૃત્તિરન્તરેણાપિ વિધિં લોકવદિતિ ચેત્તન્ન । યતઃ ।
અન્તરેણ વિધિં મોહાદ્યઃ કુર્યાત્સામ્પરાયિકમ્ ।
ન તત્સ્યાદુપકારાય ભસ્મનીવ હુતં હવિઃ ॥ ૧૬॥

અભ્યુપગતપ્રામાણ્યવેદાર્થવિજ્જૈમિન્યનુશાસનાચ્ચ ।
"આમ્નાયસ્ય ક્રિયાર્થત્વાદાનર્થક્યમ્" ઇતોઽન્યથા ।
ઇતિ સાટોપમાહોચ્ચૈર્વેદવિજ્જૈમિનિઃ સ્વયમ્ ॥ ૧૭॥

મન્ત્રવર્ણાચ્ચ ।
"કુર્વન્નેવેહ કર્માણિ જિજીવિષેચ્છતં સમાઃ" ।

ઇતિ મન્ત્રોઽપિ નિશ્શેષં કર્મણ્યાયુરવાસૃજત્ ॥ ૧૮॥

જ્ઞાનિનશ્ચ વસ્તુનિ વાક્યપ્રામાણ્યાભ્યુપગમાદ્વાક્યસ્ય ચ
ક્રિયાપદપ્રધાનત્વાત્તતશ્ચાભિપ્રેતજ્ઞાનાભાવઃ ।
વિરહય્ય ક્રિયાં નૈવ સંહન્યન્તે પદાન્યપિ ।
ન સમસ્ત્યપદં વાક્યં યત્સ્યાજ્જ્ઞાનવિધાયકમ્ ॥ ૧૯॥

જ્ઞાનાભ્યુપગમેઽપિ ન દોષઃ । યતઃ ।
કર્મણોઽઙ્ગાઙ્ગિભાવેન સ્વપ્રધાનતયાઽથવા ।
સમ્બન્ધસ્યેહ સંસિદ્ધેર્જ્ઞાને સત્યપ્યદોષતઃ ॥ ૨૦॥

યસ્માજ્જ્ઞાનાભ્યુપગમાનભ્યુપગમેઽપિ ન જ્ઞાનાન્મુક્તિઃ ।
અતઃ સર્વાશ્રમાણાં હિ વાઙ્મનઃકાયકર્મભિઃ ।
સ્વનુષ્ઠિતૈર્યથાશક્તિ મુક્તિઃ સ્યાન્નાન્યસાધનાત્ ॥ ૨૧॥

અસદર્થપ્રલાપોઽયમિતિ દૂષણસમ્ભાવનાયાહ ।
ઇતિ હૃષ્ટધિયાં વાચઃ સ્વપ્રજ્ઞાઽઽધ્માતચેતસામ્ ।
ઘુષ્યન્તે યજ્ઞશાલાસુ ધૂમાનદ્ધધિયાં કિલ ॥ ૨૨॥

દૂષણોપક્રમાવધિજ્ઞાપનાયાહ ।
અત્રાભિદધ્મહે દોષાન્ ક્રમશો ન્યાયબૃંહિતૈઃ ।
વચોભિઃ પૂર્વપક્ષોક્તિઘાતિભિર્નાતિસમ્ભ્રમાત્ ॥ ૨૩॥

ચતુર્વિધસ્યાપિ કર્મકાર્યસ્ય મુક્તાવસમ્ભવાન્ન મુક્તેઃ
કર્મકાર્યત્વમ્ ।
અજ્ઞાનહાનમાત્રત્વાન્મુક્તેઃ કર્મ ન સાધનમ્ ।
કર્માપમાર્ષ્ટિ નાજ્ઞાનં તમસીવોત્થિતં તમઃ ॥ ૨૪॥

કર્મકાર્યત્વાભ્યુપગમેઽપિ દોષ એવ ।
એકેન વા ભવેન્મુક્તિર્યદિ વા સર્વકર્મભિઃ ।
પ્રત્યેકં ચેદ્વૃથાન્યાનિ સર્વેભ્યોઽપ્યેકકર્મતા ॥ ૨૫॥

સર્વપ્રકારસ્યાપિ કર્મણ ઉત્પત્તિત એવ વિશિષ્ટસાધ્યાભિ-
સમ્બન્ધાન્ન પરિશેષ્યન્યાયસિદ્ધિઃ ।
દુરિતક્ષપણાર્થત્વાન્ન નિત્યં સ્યાદ્વિમુક્તયે ।
સ્વર્ગાદિફલસમ્બન્ધાત્કામ્યં કર્મ તથૈવ ન ॥ ૨૬॥

પ્રમાણાસમ્ભવાચ્ચ ।

સાધ્યસાધનભાવોઽયં વચનાત્પારલૌકિકઃ ।
નાશ્રૌષં મોક્ષદં કર્મ શ્રુતેર્વક્ત્રાત્કથંચન ॥ ૨૭॥

અભ્યુપગતાભ્યુપગમાચ્ચ શ્વશ્રૂનિર્ગચ્છોક્તિવદ્ભવતો
નિષ્પ્રયોજનઃ પ્રલાપઃ ।
નિષિદ્ધકામ્યયોસ્ત્યાગસ્ત્વયાપીષ્ટો યથા મયા ।
નિત્યસ્યાફલવત્ત્વાચ્ચ ન મોક્ષઃ કર્મસાધનઃ ॥ ૨૮॥

એવં તાવત્ "મુક્તેઃ ક્રિયાભિઃ સિદ્ધત્વાત્" ઇતિ
નિરસ્તોઽયં
પક્ષઃ । અથાધુના સર્વકર્મપ્રવૃત્તિહેતુનિરૂપણેન
યથાવસ્થિતાત્મવસ્તુવિષયકેવલજ્ઞાનમાત્રાદેવ
સકલસંસારાનર્થનિવૃત્તિરિતીમં પક્ષં દ્રઢયિતુકામ
આહ ।
ઇહ ચેદં પરીક્ષ્યતે । કિં યથા પ્રતિષિદ્ધેષુ
યાદૃચ્છિકેષુ ચ કર્મસુ
સ્વાભાવિકસ્વાશયોત્થનિમિત્તવશાદેવેદં
હિતમિદમહિતમિતિ વિશેષાન્ પરિકલ્પ્ય
મૃગતૃષ્ણિકોદકપિપાસુરિવ
લૌકિકપ્રમાણપ્રસિદ્ધાન્યેવ સાધનાન્યુપાદાય
હિતપ્રાપ્તયેઽહિતનિરાસાય ચ સ્વયમેવ પ્રવર્તતે નિવર્તતે ચ
તથૈવાદૃષ્ટાર્થેષુ કામ્યેષુ નિત્યેષુ ચ કર્મસુ કિં
વાન્યદેવ તત્ર પ્રવૃત્તિનિવૃત્તિનિમિત્તમિતિ । કિંચાતઃ ।
યદ્યેવં શ્રુણુ । યદિ તાવદ્યથાવસ્થિતવસ્તુસમ્યગ્જ્ઞાનં
પ્રમાણભૂતં લૌકિકમાગમિકં વા પ્રવૃત્તિનિમિત્તમિતિ
નિશ્ચીયતે નિવૃત્તિશાસ્ત્રં ચ નાભ્યુપગમ્યતે તદા
હતાઃ કર્મત્યાગિનો ભ્રાન્તિવિજ્ઞાનમાત્રાવષ્ટમ્ભાદલૌકિક-
પ્રમાણોપાત્તકર્માનુષ્ઠાનત્યાગિત્વાચ્ચ । અથ
મૃગતૃષ્ણિકોદકપિપાસુપ્રવૃત્તિનિમિત્તવદયથાવસ્તુભ્રાન્તિ-
વિજ્ઞાનમેવ સર્વપ્રવૃત્તિનિમિત્તં તદા વર્દ્ધામહે વયં
હતાઃ સ્થ યૂયમિતિ ।
હિતં સમ્પ્રેપ્સતાં મોહાદહિતં ચ જિહાસતામ્ ।
ઉપાયાન્પ્રાપ્તિહનાર્થાન્ શાસ્ત્રં ભાસયતેઽર્કવત્ ॥ ૨૯॥

એવં તાવત્પ્રત્યક્ષાનુમાનાગમપ્રમાણાવષ્ટમ્ભાદાત્મનો
નિરતિશયસુખહિતાવ્યતિરેકસિદ્ધેરહિતસ્ય ચ
ષષ્ઠગોચરવત્સ્વત એવાનભિસમ્બન્ધાદેવંસ્વાભાવ્યા-
ત્માનવબોધમાત્રાદેવ હિતં મે સ્યાદહિતં મે મા ભૂદિતિ
મિથ્યાજ્ઞાનં તૂષરશુક્તિકાનવબોધોત્થમિથ્યાજ્ઞાનવત્-
પ્રવૃત્તિનિમિત્તમિતિ નિર્ધારિતમ્ । શાસ્ત્રં ચ ન
પદાર્થશક્ત્યાધાનકૃદિતિ । અથૈતસ્યૈવોત્તરત્ર પ્રપઞ્ચ
આરભ્યતે ।
ન પરીપ્સાં જિહાસાં વા પુંસઃ શાસ્ત્રં કરોતિ હિ ।
નિજે એવ તુ તે યસ્માત્પશ્વાદાવપિ દર્શનાત્ ॥ ૩૦॥

ઉક્તં તાવદનવબુદ્ધવસ્તુયાથાત્મ્ય એવ
વિધિપ્રતિષેશશાસ્ત્રેષ્વધિક્રિયત ઇતિ ।
લિપ્સતેઽજ્ઞાનતોઽલબ્ધં કણ્ઠે ચામીકરં યથા ।
વર્જિતં ચ સ્વતો ભ્રાન્ત્યા છાયાયામાત્મનો યથા ॥ ૩૧॥

ભયાન્મોહાવનદ્ધાત્મા રક્ષઃ પરિજિહીર્ષતિ ।
પશ્ચાપરિહૃતં વસ્તુ તથાલબ્ધં ચ લિપ્સતે ॥ ૩૨॥

તત્રૈતેષુ ચતુર્ષુ વિષયેષુ પ્રાપ્તયે પરીહારાય
ચ વિભજ્ય ન્યાયઃ પ્રદર્શ્યતે ।
પ્રાપ્તવ્યપરિહાર્યેષુ જ્ઞાત્વોપાયાઞ્છૃતેઃ પૃથક્ ।
કૃત્વાથ પ્રાપ્નુયાત્પ્રાપ્યં તથાનિષ્ટં જહાત્યપિ ॥ ૩૩॥

અથાવશિષ્ટયોઃ સ્વભાવત એવ ।
પરિહૃતાવાપ્તયોર્બોધાદ્ધાનપ્રાપ્તી ન કર્મણા ।
મોહમાત્રાન્તરાયત્વાત્ક્રિયયા તે ન સિધ્યતઃ ॥ ૩૪॥

કસ્માત્પુનરાત્મવસ્તુયાથાત્મ્યાવબોધમાત્રાદેવાભિલષિત-
નિરતિશયસુખાવાપ્તિનિશ્શેષદુઃખનિવૃત્તી ભવતો ન તુ
કર્મણેતિ । ઉચ્યતે ।
કર્માજ્ઞાનસમુત્થત્વાન્નાલં મોહાપનુત્તયે ।
સમ્યગ્જ્ઞાનં વિરોધ્યસ્ય તામિસ્રસ્યાંશુમાનિવ ॥ ૩૫॥

નન્વાત્મજ્ઞાનમપ્યવિદ્યોપાદાનમ્ । ન હિ
શાસ્ત્રશિષ્યાચાર્યાધનુપાદાયાત્મજ્ઞાનમાત્માનં

લભતઃ ઇતિ । નૈષ દોષઃ । યત આત્મજ્ઞાનં હિ
સ્વતસ્સિદ્ધપરમાર્થાત્મવસ્તુસ્વરૂપમાત્રાશયાદેવાવિદ્યાતદુત્
પન્ન
કારકગ્રામપ્રધ્વંસિ સ્વાત્મોપતાવેવ શાસ્ત્રાદપેક્ષ્યતે
નોત્પન્નમવિદ્યાનિવૃત્તૌ । કર્મ પુનઃ સ્વાત્મોત્પત્તાવુત્પન્નં
ચ । ન હિક્રિયા કારકનિસ્સ્પૃહા કલ્પકોટિવ્યવહિતફલદાનાય
સ્વાત્માનં બિભર્તિ સાધ્યમાનમાત્રરૂપત્વાત્તસ્યાઃ । ન ચ
ક્રિયાત્મજ્ઞાનવત્સ્વાત્મપ્રતિલમ્ભકાલ એવ સ્વર્ગાદિફલેન
કર્તારં સમ્બધ્નાતિ । આત્મજ્ઞાનં પુનઃ પુરુષાર્થસિદ્ધૌ
નોત્પદ્યમાનસ્વરૂપવ્યતિરેકેણાન્યદ્રૂપાન્તરં સાધનાન્તરં
વાપેક્ષતે । કુત એતત્ । યતઃ ।
બલવદ્ધિ પ્રમાણોત્થં સમ્યગ્જ્ઞાનં ન બાધ્યતે ।
આકાઙ્ક્ષતે ન ચાપ્યાન્યદ્બાધનં પ્રતિ સાધનમ્ ॥ ૩૬॥

સ્વપક્ષસ્ય હેત્વવષ્ટમ્ભેન સમર્થિતત્વાનિરાશઙ્ક-
મુપસંહ્રિયતે ।
તસ્માદ્દુઃખોદધેર્હેતોરજ્ઞાનસ્યાપનુત્તયે ।
સમ્યગ્જ્ઞાનં સુપર્યાપ્તં ક્રિયા ચેન્નોક્તહેતુતઃ ॥ ૩૭॥

નનુ બલવદપિ સમ્યગ્જ્ઞાનં સદપ્રમાણોત્થેન
બાધ્યમાનમુપલભામહે યત ઉત્પન્નપરમાર્થબોધસ્યાપિ
કર્તૃત્વભોક્તૃત્વરાગદ્વેષાદ્યનવબોધોત્થપ્રત્યયા
આવિર્ભવન્તિ । ન હ્યબાધિતે સમ્યગ્જ્ઞાને તદ્વિરુદ્ધાનાં
પ્રત્યયાનાં સમ્ભવોઽસ્તિ । નૈતદેવમ્ । કુતઃ ।
બાધિતત્વાદવિદ્યાયા વિદ્યાં સા નૈવ બાધતે ।
તદ્વાસના નિમિત્તત્વં યાન્તિ વિદ્યાસ્મૃતેર્ધ્રુવન્ ॥ ૩૮॥

"કર્માજ્ઞાનસમુત્થત્વાત્" ઇત્યુક્તો હેતુસ્તસ્ય ચ
સમર્થનં પૂર્વમેવાભિહિતં "હિતં સમ્પ્રેપ્સતામ્"
ઇત્યાદિના । તદભ્યુચ્ચયાર્થમવિદ્યાન્વયેન ચ
સંસારાન્વયિત્વં પ્રદર્શયિષ્યામીત્યત આહ ।
બ્રાહ્મણ્યાદ્યાત્મકે દેહે લાત્વા નાત્મેતિ ભાવનામ્ ।
શ્રુતેઃ કિઙ્કરતામેતિ વાઙ્મનઃકાયકર્મસુ ॥ ૩૯॥

યસ્માત્કર્માજ્ઞાનસમુત્થમેવ તસ્માત્તદ્વ્યાવૃત્તૌ નિવર્તત
ઇત્યુચ્યતે ।
દગ્ધાખિલાધિકારશ્ચેદ્બ્રહ્મજ્ઞાનાગ્નિના મુનિઃ ।
વર્તમાનઃ શ્રુતેર્મૂર્ધ્નિ નૈવ સ્યાદ્વેદકિઙ્કરઃ ॥ ૪૦॥

અથેતરો ઘનતરાવિદ્યા પટલસંવીતાન્તઃકરણોઽઙ્ગીકૃત-
કર્તૃત્વાદ્યશેષકર્માધિકારકારણો
વિધિપ્રતિષેધચોદનાસંદંશોપદષ્ટઃ
કર્મસુ પ્રવર્તમાનઃ ।
શુભૈઃ પ્રાપ્નોતિ દેવત્વં નિષિદ્ધૈર્નારકીં ગતિમ્ ।
ઉભાભ્યાં પુણ્યપાપાભ્યાં માનુષ્યં લભતેઽવશઃ ॥ ૪૧॥

આબ્રહ્મસ્તમ્બપર્યન્તે ઘોરે દુઃખોદધૌ
ઘટીયન્ત્રવદારોહાવરોહન્યાયેનાધમમધ્યમોત્તમસુખદુઃખ-
મોહવિદ્યુચ્ચપલસમ્પાતદાયિનીર્વિચિત્રયોનીશ્ચણ્ડોત્પિઞ્જલ-
કશ્વસનવેગાભિહતામ્ભોધિમધ્યવર્તિશુષ્કાલાબુવચ્છુભા-
શુભવ્યામિશ્રકર્મવાયુસમીરિતઃ ।
એવં ચઙ્ક્રમ્યમાણોઽયમવિદ્યાકામકર્મભિઃ ।
પાશિતો જાયતે કામી મ્રિયતે ચાસુખાવૃતઃ ॥ ૪૨॥

યથોક્તેઽર્થે આદરવિધાનાય પ્રમાણોપન્યાસઃ ।
શ્રુતિશ્ચેમં જગાદાર્થં કામસ્ય વિનિવૃત્તયે ।
તન્મૂલા સંસૃતિર્યસ્માત્તન્નાશોઽજ્ઞાનહાનતઃ ॥ ૪૩॥

કા ત્વસૌ શ્રુતિરિતિ ચેત્ ।
"યદા સર્વે પ્રમુચ્યન્ત" "ઇતિ નુ" ઇતિ ચ
વાજિનઃ ।
કામબન્ધનમેવેદં વ્યાસોઽપ્યાહ પદેપદે ॥ ૪૪॥

એષ સંસારપન્થા વ્યાખ્યાતઃ । અથેદાનીં તદ્વ્યાવૃત્તયે
કર્માણ્યારાદુપકારકત્વેન યથા મોક્ષહેતુતાં પ્રતિપદ્યન્તે
તથાભિધીયતે ।
તસ્યૈવં દુઃખતપ્તસ્ય કથંચિત્પુણ્યશીલનાત્ ।
નિત્યેહાક્ષાલિતધિયો વૈરાગ્યં જાયતે હૃદિ ॥ ૪૫॥

કીદૃગ્વૈરાગ્યમુત્પદ્યત ઇતિ । ઉચ્યતે ।

નરકાદ્ભીર્યથાસ્યાભૂત્તથા કામ્યફલાદપિ ।
યથાર્થદર્શનાત્તસ્માન્નિત્યં કર્મ ચિકીર્ષતિ ॥ ૪૬॥

એવં નિત્યનૈમિત્તિકકર્માનુષ્ઠાનેન ।
શુધ્યમાનં તુ તચ્ચિત્તમીશ્વરાર્પિતકર્મભિઃ ।
વૈરાગ્યં બ્રહ્મલોકાદૌ વ્યનક્ત્યથ સુનિર્મલમ્ ॥ ૪૭॥

યસ્માદ્રજસ્તમોમલોપસંસૃષ્ટમેવ ચિત્તં
કામબડિશેનાકૃષ્ય વિષયદુરન્તસૂનાસ્થાનેષ નિક્ષિપ્યતે
તસ્માન્નિત્યનૈમિત્તિકકર્માનુષ્ઠાનપરિમાર્જનેનાપવિદ્ધ-
રજસ્તમોમલં પ્રસન્નમનાકુલં સંમાર્જિતસ્ફટિકશિલાકલ્પં
બાહ્યવિષયહેતુકેન ચ રાગદ્વેષાત્મકેનાતિગ્રહબડિશેના-
નાકૃષ્યમાણં વિધૂતાશેષકલ્મષં પ્રત્યઙ્માત્રપ્રવણં
ચિત્તદર્પણમવતિષ્ટતે । અત ઇદમભિધીયતે ।
વ્યુત્થિતાશેષકામેભ્યો યદા ધીરવતિષ્ઠતે ।
તદૈવ પ્રત્યગાત્માનં સ્વયમેવાવિવિક્ષતિ ॥ ૪૮॥

અતઃપરમવસિતાધિકારાણિ કર્માણિ પ્રત્યક્પ્રવણવત્વસૂનૌ
કૃતસમ્પ્રત્તિકાનિ ચરિતાર્થાનિ સન્તિ ।
પ્રત્યક્પ્રવણતાં બુદ્ધેઃ કર્માણ્યુત્પાદ્ય શુદ્ધિતઃ ।
કૃતાર્થાન્યસ્તમાયાન્તિ પ્રાવૃડન્તે ઘના ઇવ ॥ ૪૯॥

યતો નિત્યકર્માનુષ્ઠાનસ્યૈષ મહિમા ।
તસ્માન્મુમુક્ષુભિઃ કાર્યમાત્મજ્ઞાનાભિલાષિભિઃ ।
નિત્યં નૈમિત્તિકં કર્મ સદૈવાત્મવિશુદ્ધયે ॥ ૫૦॥

યથોક્તેઽર્થે સર્વજ્ઞવચનં પ્રમાણમ્ ।
"આરુરુક્ષોર્મુનેર્યોગં કર્મ કારણમુચ્યતે ।
યોગારૂઢસ્ય તસ્યૈવ શમ" એવેતિ ચ સ્મૃતિઃ ॥ ૫૧॥

નિત્યકર્માનુષ્ઠાનાદ્ધર્મોત્પત્તિર્ધર્મોત્પત્તેઃ
પાપહાનિસ્તતશ્ચિત્તશુદ્ધિસ્તતઃ
સંસારયાથાત્મ્યાવબોધસ્તતો વૈરાગ્યં તતો મુમુક્ષુત્વં
તતસ્તદુપાયપર્યેષણં
તતઃ સર્વકર્મતત્સાધનસંન્યાસસ્તતો
યોગાભ્યાસસ્તતશ્ચિત્તસ્ય પ્રત્યક્પ્રવણતા

તતસ્તત્ત્વમસ્યાદિવાક્યાર્થપરિજ્ઞાનં
તતોઽવિદ્યોચ્છેદસ્તતશ્ચ સ્વાત્મન્યે-
વાવસ્થાનં "બ્રહ્મૈવ સન્ બ્રહ્માપ્યેતિ"
"વિમુક્તશ્ચ વિમુચ્યતે" ઇતિ ।
પારમ્પર્યેણ કર્મૈવં સ્યાદવિદ્યાનિવૃત્તયે ।
જ્ઞાનવન્નાવિરોધિત્વાત્કર્માવિદ્યાં નિરસ્યતિ ॥ ૫૨॥

ન ચ કર્મણઃ કાર્યમણ્વપિ મુક્તૌ સમ્ભાવ્યતે નાપિ મુક્તૌ
યત્સમ્ભવતિ તત્કર્માપેક્ષતે । તદુચ્યતે ।
ઉત્પાદ્યમાપ્યં સંસ્કાર્યં વિકાર્યં ચ ક્રિયાફલમ્ ।
નૈવં મુક્તિર્યતસ્તસ્માત્કર્મ તસ્યા ન સાધનમ્ ॥ ૫૩॥

એવં તાવત્કેવલં કર્મ સાક્ષાદવિદ્યાપનુત્તયે ન
પર્યાપ્તમિતિ પ્રપઞ્ચિતમ્ । મુક્તૌ ચ મુમુક્ષુજ્ઞાનત-
દ્વિષયસ્વાભાવ્યાનુરોધેન સર્વપ્રકારસ્યાપિ કર્મણોઽસમ્ભવ
ઉક્તૌ "હિતં સમ્પ્રેપ્સતામ્" ઇત્યાદિના ।
યાદૃશશ્ચારાદુપકારકત્વેન જ્ઞાનોત્પત્તૌ કર્મણાં
સમુચ્ચયઃ સમ્ભવતિ તથા પ્રતિપાદિતમ્ । અવિદ્યોચ્છિત્તૌ તુ
લબ્ધાત્મસ્વભાવસ્યાત્મજ્ઞાનસ્યૈવાસાધારણં
સાધકતમત્વં
નાન્યસ્ય પ્રધાનભૂતસ્ય ગુણભૂતસ્ય ચેત્યેતદધુનોચ્યતે ।
તત્ર જ્ઞાનં ગુણભૂતં તાવદહેતુરિત્યેતદાહ ।
સંનિપત્ય ન ચ જ્ઞાનં કર્માજ્ઞાનં નિરસ્યતિ ।
સાધ્યસાધનભાવત્વાદેકકાલાનવસ્થિતેઃ ॥ ૫૪॥

સમપ્રધાનયોરપ્યસમ્ભવ એવ ।
બાધ્યબાધકભાવાચ્ચ પઞ્ચાસ્યોરણયોરિવ ।
એકદેશાનવસ્થાનાન્ન સમુચ્ચયતા તયોઃ ॥ ૫૫॥

કુતો બાધ્યબાધકભાવઃ । યસ્માત્ ।
અયથાવસ્ત્વવિદ્યા સ્યાદ્વિદ્યા તસ્યા વિરોધિની ।
સમુચ્ચયસ્તયોરેવં રવિશાર્વરયોરિવ ॥ ૫૬॥

તસ્માદકારકબ્રહ્માત્મનિ પરિસમાપ્તાવબોધસ્યાશેષકર્મ-
ચોદનાનામચોદ્યસ્વાભાવ્યાત્કુણ્ઠતા । કથં તત્ ।

અભિધીયતે ।
બૃહસ્પતિસવે યદ્વત્ક્ષત્રિયો ન પ્રવર્તતે ।
બ્રાહ્મણત્વાદ્યહંમાની વિપ્રી વા ક્ષત્રકર્મણિ ॥ ૫૭॥

યથાયં દૃષ્ટાન્ત એવં દાર્ષ્ટાન્તિકોઽપીત્યેતદાહ ।
વિદેહો વીતસન્દેહો નેતિનેત્યવશેષિતઃ ।
દેહાદ્યનાત્મદૃક્તદ્વત્ક્રિયાં વીક્ષતેઽપિ ન ॥ ૫૮॥

તસ્યાર્થસ્યાવિષ્કરણાર્થમુદાહરણમ્ ।
મૃત્સ્નેભકે યથેભત્વં શિશુરધ્યસ્ય વલ્ગતિ ।
અધ્યસ્યાત્માનિ દેહાદીન્મૂઢસ્તદ્વત્વિચેષ્ટતે ॥ ૫૯॥

ન ચ વયં જ્ઞાનકર્મણોઃ સર્વત્રૈવ પ્રત્યાચક્ષ્મહે । યત્ર
પ્રયોજ્યપ્રયોજકભાવો જ્ઞાનકર્મણોસ્તત્ર નાસ્મત્પિત્રાપિ શક્યતે
નિવારયિતુમ્ । તત્ર વિભાગપ્રદર્શનાયોદાહરણં પ્રદર્શ્યતે ।
સ્થાણું ચોરધિયાલાય ભીતો યદ્વત્પલાયતે ।
બુદ્ધ્યાદિભિસ્તથાત્માનં ભ્રાન્તોઽધ્યારીપ્ય ચેષ્ટતે ॥ ૬૦॥

એવં યત્રયત્ર જ્ઞાનકર્મણોઃ પ્રયોજ્યપ્રયોજકભાવસ્તત્ર
સર્વત્રાયં ન્યાયઃ । યત્ર તુ ન સમકાલં નાપિ
ક્રમેણોપપદ્યતે
સમુચ્ચયઃ સવિષય ઉચ્યતે ।
સ્થાણોઃ સતત્ત્વવિજ્ઞાનં યથા નાઙ્ગં પલાયતે ।
આત્મનસ્તત્ત્વવિજ્ઞાનં તદ્વન્નાઙ્ગં ક્રિયાવિધૌ ॥ ૬૧॥

યસ્માદ્ગુણસ્યૈતત્સ્વાભાવ્યમ્ ।
યદ્ધિ યસ્યાનુરોધેન સ્વભાવમનુવર્તતે ।
તત્તસ્ય ગુણભૂતં સ્યાન્ન પ્રધાનાદ્ગુણો યતઃ ॥ ૬૨॥

યસ્માત્ ।
કર્મપ્રકરણાકાઙ્ક્ષિજ્ઞાનં કર્મગુણો ભવેત્ ।
યદ્ધિ પ્રકરણે યસ્ય તત્તદઙ્ગં પ્રચક્ષતે ॥ ૬૩॥

સ્વરૂપલાભમાત્રેણ યત્ત્વવિદ્યાં નિહન્તિ નઃ ।
ન તદઙ્ગં પ્રધાનં વા જ્ઞાનં સ્યાત્કર્મણઃ ક્વચિત્ ॥ ૬૪॥

સમુચ્ચયપક્ષવાદિનાપ્યવશ્યમેતદભ્યુપગન્તવ્યમ્ ।

યસ્માત્ ।
અજ્ઞાનમનિરાકુર્વજ્જ્ઞાનમેવ ન સિધ્યતિ ।
વિપન્નકારકગ્રામં જ્ઞાનં કર્મ ન ઢૌકતે ॥ ૬૫॥

ઇદં ચાપરં કારણં જ્ઞાનકર્મણોઃ સમુચ્ચયનિબર્હિ ।
હેતુસ્વરૂપકાર્યાણિ પ્રકાશતમસોરિવ ।
વિરોધીનિ તતો નાસ્તિ સાઙ્ગત્યં જ્ઞાનકર્મણોઃ ॥ ૬૬॥

એવમુપસંહૃતે કેચિત્સ્વસમ્પ્રદાયબલાવષ્ટમ્ભાદાહુર્યદે-
તદ્વેદાન્તવાક્યાદહં બ્રહ્મેતિ વિજ્ઞાનં સમુત્પદ્યતે તન્નૈવ
સ્વોત્પત્તિમાત્રેણાજ્ઞાનં નિરસ્યતિ । કિં તર્હિ । અહન્યહનિ
દ્રાઘીયસા કાલેનોપાસીનસ્ય સતો ભાવનોપચયાન્નિશ્શેષમ્
અજ્ઞાનમપગચ્છતિ "દેવો ભૂત્વા દેવાનપ્યેતિ" ઇતિ
શ્રુતેઃ । અપરે તુ બ્રુવતે વેદાન્તવાક્યજનિતમહં બ્રહ્મેતિ
વિજ્ઞાનં સંસર્ગાત્મકત્વાદાત્મવસ્તુયાથાત્મ્યાવગાહ્યેવ ન
ભવતિ । કિં તર્હિ ।
એતદેવ ગઙ્ગાસ્રોતોવત્સતતમભ્યસ્યતોઽન્યદેવાવાક્યાર્થાત્મકં
વિજ્ઞાનાન્તરમુત્પદ્યતે । અસ્ય પક્ષદ્વયસ્ય નિવૃત્તય
ઇદમભિધીયતે ।
સકૃત્પ્રવૃત્ત્યા મૃદ્નાતિ ક્રિયાકારકરૂપભૃત્ ।
અજ્ઞાનમાગમજ્ઞાનં સાઙ્ગત્યં નાસ્ત્યતોઽનયોઃ ॥ ૬૭॥

એવં તાવદનાનાત્વે બ્રહ્મણિ જ્ઞાનકર્મણોઃ સમુચ્ચયો
નિરાકૃતઃ । અથાધુના પક્ષાન્તરાભ્યુપગમેનાપિ
પ્રત્યવસ્થાને પૂર્વવદનાશ્વાસો યથા તથાભિધીયતે ।
અનુત્સારિતનાનાત્વં બ્રહ્મ યસ્યાપિ વાદિનઃ ।
તન્મતેનાપિ દુસ્સાધ્યો જ્ઞાનકર્મસમુચ્ચયઃ ॥ ૬૮॥

તસ્ય વિભાગોક્તિર્દૂષણવિભાગપ્રજ્ઞપ્તયે ।
બ્રહ્માત્મા વા ભવેત્તસ્ય યદિ વાનાત્મરૂપકમ્ ।
આત્માનાપ્તિર્ભવેન્મોહાદિતરસ્યાપ્યનાત્મનઃ ॥ ૬૯॥

તત્ર યદિ તાવદ્વાસ્તવેનૈવ વૃત્તેન બ્રહ્મ
પ્રાપ્તમાત્મસ્વાભાવ્યાત્કેવલમાસુરમોહાપિધાનમાત્ર-
મેવાનાપ્તિનિમિત્તં તસ્મિન્પક્ષે ।

મોહાપિધાનભઙ્ગાય નૈવ કર્માણિ કારણમ્ ।
જ્ઞાનેનૈવ ફલાવાપ્તેસ્તત્ર કર્મ નિરર્થકમ્ ॥ ૭૦॥

અનાત્મરૂપકે તુ બ્રહ્મણિ ન કર્મ સાધનભાવં પ્રતિપદ્યતે
નાપિ જ્ઞાનં કર્મસમુચ્ચિતમસમુચ્ચિતં વા યસ્માદન્યસ્ય
સ્વત એવ સાધકસ્ય બ્રહ્મણોઽપ્યન્યત્વં સ્વત એવ સિદ્ધમ્ ।
તત્રૈવમ્ ।
અન્યસ્યાન્યાત્મતાપ્રાપ્તૌ ન ક્વચિદ્ધેતુસમ્ભવઃ ।
તસ્મિન્ સત્યપિ નો નષ્ટઃ પરાત્માનં પ્રપદ્યતે ॥ ૭૧॥

અપરસ્મિંસ્તુ પક્ષે વિધિઃ ।
પરમાત્માનુકૂલેન જ્ઞાનાભ્યાસેન દુઃખિનઃ ।
દ્વૈતિનોઽપિ પ્રમુચ્યેરન્ન પરાત્મવિરોધિના ॥ ૭૨॥

ઇતરસ્મિંસ્તુ પક્ષે વિધેરેવાનવકાશત્વમ્ । કથમ્ ।
સમસ્તવ્યસ્તભૂતસ્ય બ્રહ્મણ્યેવાવતિષ્ઠતઃ ।
બ્રૂત કર્મણિ કો હેતુઃ સર્વાનન્યત્વદર્શિનઃ ॥ ૭૩॥

સર્વકર્મનિમિત્તસમ્ભવાસમ્ભવાભ્યાં સર્વકર્મસઙ્કરશ્ચ
પ્રાપ્નોતિ । યસ્માત્ ।
સર્વજાત્યાદિમત્ત્વેઽસ્ય નિતરાં હેતસમ્ભવઃ ।
વિશેષં હ્યનુપાદાય કર્મ નૈવ પ્રવર્તતે ॥ ૭૪॥

સ્યાદ્વિધિરધ્યાત્મભિમાનાદિતિ ચેન્નૈવમ્ । યસ્માત્ ।
ન ચાધ્યાત્માભિમાનોઽપિ વિદુષોઽસ્ત્યાસુરત્વતઃ ।
વિદુષોઽપ્યાસુરશ્ચેત્સ્યાન્નિષ્ફલં બ્રહ્મદર્શનમ્ ॥ ૭૫॥

અજ્ઞાનકાર્યત્વાન્ન સમકાલં નાપિ ક્રમેણ
જ્ઞાનકર્મણોર્વસ્ત્વવસ્તુ-
તન્ત્રત્વાત્સઙ્ગતિરસ્તીત્યેવં નિરાકૃતોઽપિ કાશં કુશં
વાવલમ્બ્યાહ ॥

અથાધ્યાત્મં પુનર્યાયાદાશ્રિતો મૂઢતાં ભવેત્ ।
સ કરોત્યેવ કર્માણિ કો હ્યજ્ઞં વિનિવારયેત્ ॥ ૭૬॥

સિદ્ધત્વાચ્ચ ન સાધ્યમ્ । યતઃ ।
સામાન્યેતરરૂપાભ્યાં કર્માત્મૈવાસ્ય યોગિનઃ ।

નિશ્વાસોચ્છ્વાસવત્તસ્માન્ન નિયોગમપેક્ષતે ।  ॥ ૭૭॥

અસ્તુ તર્હિ ભિન્નાભિન્નાત્મકં બ્રહ્મ । તથા ચ સતિ જ્ઞાનકર્મણો સમ્ભવતો ભેદાભેદવિષયત્વાત્તયોઃ । તત્ર તાવદયં પક્ષ એવ ન સમ્ભવતિ । કિં કારણમ્ । ન હિ ભિન્નોઽયમિત્યભેદબુદ્ધિમનિરાકૃત્ય ભેદબુદ્ધિઃ પદાર્થમાલિઙ્ગતે । એવં હ્યનભ્યુપગમે ભિન્નાભિન્ન-પદાર્થયોરલૌકિકત્વં પ્રસજ્યેત । અથ નિષ્પ્રમાણકમ-પ્યાશ્રીયતે તદપ્યુભયપક્ષાભ્યુપગમાદભેદપક્ષે દુઃખિ બ્રહ્મ સ્યાદત આહ ।
ભિન્નાભિન્નં વિશેષૈશ્ચેદ્દુઃખિ સ્યાદ્બ્રહ્મ તે ધ્રુવમ્ ।
અશેષદુઃખિતા ચ સ્યાદહો પ્રજ્ઞાત્મવાદિનામ્ ॥ ૭૮॥

તસ્માત્સમ્યગેવાભિહિતં ન જ્ઞાનકર્મણોઃ સમુચ્ચય ઇત્યુપસંહ્રિયતે ।
તમોઽઙ્ગત્વં યથા ભાનોરગ્નેશ્શીતાઙ્ગતા યથા ।
વારિણશ્ચોષ્ણતા યદ્વજ્જ્ઞાનસ્યૈવં ક્રિયાઙ્ગતા ॥ ૭૯॥

યથોક્તોપપત્તિબલેનૈવ પૂર્વપક્ષસ્યોત્સારિતત્વાદ્વક્તવ્યં નાવશેષિતમિત્યતઃ પ્રતિપત્તિકર્મવત્પૂર્વપક્ષપરિહારાય યત્કિઞ્ચિદ્વક્તવ્યમિત્યત ઇદમભિધીયતે ।
"મુક્તેઃ ક્રિયાભિઃ સિદ્ધત્વાત્" ઇત્યાદ્યનુચિતં બહુ ।
યદભાણિ તદન્યાય્યં યથા તદદ્યુનોચ્યતે ॥ ૮૦॥

યોઽયં કામ્યાનાં પ્રતિષિદ્ધાનાં ચ ત્યાગઃ પ્રતિજ્ઞાયતે સા પ્રતિજ્ઞા તાવન્ન શક્યતેઽનુષ્ઠાતુમ્ । કિં કારણમ્ । કર્મણો હિ નિર્વૃત્તાત્મનો દ્વાભ્યાં પ્રકારાભ્યાં નિવૃત્તિઃ સમ્ભવત્યારબ્ધફલસ્યોપભોગેનાનારબ્ધફલસ્યાશુભસ્ય પ્રાયશ્ચિત્તૈરિતિ । તૃતીયોઽપિ ત્યાગપ્રકારોઽકર્ત્રા-ત્માવબોધાત્ સ ત્વાત્મજ્ઞાનાનભ્યુપગમાદ્ભવતા નાભ્યુપગમ્યતે । તત્ર યાન્યનુપભુક્તફલાન્યનારબ્ધફલાનિ તાનીશ્વરેણાપિ કેનચિદપિ ન શક્યન્તે પરિત્યક્તુમ્ । અથારબ્ધફલાનિ ત્યજ્યન્તે તાન્યપિ ન શક્યન્તે ત્યક્તુમ્ । કિં કારણમ્ । અનિવૃત્તેઃ । અનિર્વૃત્તં હિ ચિકીર્ષિતં

કર્મ શક્યતે ત્યક્તું પ્રવૃત્તિનિવૃત્તી પ્રતિ કર્તુઃ
સ્વાતન્ત્ર્યાત્ । નિર્વૃત્તે તુ કર્મણિ તદસમ્ભવાદુરનુષ્ઠેયઃ
પ્રતિજ્ઞાનાર્થઃ । અશક્યપ્રતિજ્ઞાનાચ્ચ ।
ન ચ શક્યતે પ્રતિજ્ઞાતું યાવજ્જીવં કામ્યાનિ
પ્રતિષિદ્ધાનિ ચ કર્માણિ ન કરિષ્યામીતિ સુનિપુણાનામપિ
સૂક્ષ્માપરાધદર્શનાત્ । પ્રમાણાભાવાચ્ચ ।
ન ચ પ્રમાણમસ્તિ મોક્ષકામો નિત્યનૈમિત્તિકે કર્મણી
કુર્યાત્કામ્યપ્રતિષિદ્ધે ચ વર્જયેદારબ્ધફલે ચોપભોગેન
ક્ષપયેદિતિ । આનન્ત્યાચ્ચ । ન ચોપચિતાનાં
કર્મણામિયત્તાસ્તિ સંસારસ્યાનાદિત્વાત્ । ન ચ કામ્યૈઃ
પ્રતિષિદ્ધૈર્વા તેષાં નિવૃત્તિરસ્તિ શુદ્ધ્યશુદ્ધિસામ્યે
સત્યવિરોધાદિત્યાહ ।
ન કૃત્સ્નકામ્યસંત્યાગોઽનન્તત્વાત્કર્તુમિષ્યતે ।
નિષિદ્ધકર્મણશ્ચેત્તુ વ્યતીતાનન્તજન્મસુ ॥ ૮૧॥

સ્યાન્મતં વ્યતીતાનનન્તજન્મોપાત્તાનાં કર્મણામ્ ।
ક્ષયો નિત્યેન તેષાં ચેત્પ્રાયશ્ચિત્તૈર્યથૈનસઃ ।
નિષ્ફલત્વાન્ન નિત્યેન કામ્યાદેર્વિનિવારણામ્ ॥ ૮૨॥

પ્રમાણાભાવાચ્ચ । કથમ્ ।
પાપાપનુત્તયે વાક્યાત્પ્રાયશ્ચિત્તં યથા તથા ।
ગભ્યતે કામ્યહાનાર્થં નિત્યં કર્મ ન વાક્યતઃ ॥ ૮૩॥

અથાપિ સ્યાત્કામ્યૈરેવ કામ્યાનાં પૂર્વજન્મોપચિતાનાં ક્ષયો
ભવિષ્યતીતિ । તન્ન । યતઃ ।
પાપ્મનાં પાપ્મભિર્નાસ્તિ યથૈવેહ નિરાક્રિયા ।
કામ્યૈરપિ તથૈવાસ્તુ કામ્યાનામવિરોધતઃ ॥ ૮૪॥

એવં તાવત્ "મુક્તેઃ ક્રિયાભિઃ સિદ્ધત્વાત્" ઇતિ
નિરાકૃતમ્ ॥

અથાત્મજ્ઞાનસ્ય સદ્ભાવે પ્રમાણાસમ્ભવ
ઉક્તસ્તત્પરિહારાયાહ ।
શ્રુતયસ્સ્મૃતિભિસ્સામાનન્ત્યાત્કામિનામિહ ।
વિદધત્યુરુયત્નેન કર્માતો બહુકામદમ્ ॥ ૮૫॥

ન ચ બાહુલ્યં પ્રામાણ્યે કારણભાવં પ્રતિપદ્યતે । અત આહ ।
પ્રામાણ્યાય ન બાહુલ્યં ન હ્યેકત્ર પ્રમાણતામ્ ।
વસ્તુન્યટન્તિ માનાનિ ત્વેકત્રૈકસ્ય માનતા ॥ ૮૬॥

યત્તૂક્તં "યત્નતો વીક્ષમાણોઽપિ" ઇતિ – તત્રાપિ
ભવત એવાપરાધઃ । કસ્માત્ । યતઃ ।
"પરીક્ષ્ય લોકાન્" ઇત્યાદ્યા આત્મજ્ઞાનવિધાયિનીઃ ।
નૈષ્કર્મ્યપ્રવણાસ્સાધ્વીઃ શ્રુતીઃ કિં ન શ‍ૃણોષિ તાઃ ॥

૮૭॥

નનુ "આત્મેત્યેવોપાસીત" "આત્મા વા અરે
દ્રષ્ટવ્યઃ" ઇત્યપૂર્વવિધિશ્રુતેઃ
પુરુષસ્યાત્મદર્શનક્રિયાયાં નિયોગોઽવસીયત ઇતિ । નૈવમ્ ।
અપુરુષતન્ત્રત્વાદ્વસ્તુયાથાત્મ્યજ્ઞાનસ્ય
સકલાનર્થબીજાત્માનવબોધોત્સારિણો મુક્તિહેતોરિતિ ।
વિધ્યભ્યુપગમેઽપિ નાપૂર્વવિધિરયમ્ । અત આહ ।
નિયમઃ પરિસંખ્યા વા વિધ્યર્થોઽપિ ભવેદ્યતઃ ।
અનાત્માદર્શનેનૈવ પરાત્માનમુપાસ્મહે ॥ ૮૮॥

યચ્ચોક્તં "વિશ્વાસો નાન્યતોઽસ્તિ નઃ" ઇતિ – તદપિ
નિદ્રાતુરચેતસા ત્વયા સ્વપ્નાયમાનેન પ્રલપિતમ્ । કિં
કારણમ્ । ન હિ વયં પ્રમાણબલેનૈકાત્મ્યં પ્રતિપદ્યામહ
ઐકાત્મ્યસ્ય સ્વત એવાનુભવમાત્રાત્મકત્વાત્ । અત એવ
સર્વપ્રમાણાવતારાસમ્ભવં વક્ષ્યતિ ।
પ્રમાણવ્યવસ્થાયાશ્ચાનુભવમાત્રાશ્રયત્વાત્ ।
અત આહ ।
વાક્યૈકગમ્યં યદ્વસ્તુ નાન્યસ્માત્તત્ર વિશ્વસેત્ ।
નાઽપ્રમેયે સ્વતસ્સિદ્ધેઽવિશ્વાસઃ કથમાત્મનિ ॥ ૮૯॥

યદપ્યુક્તં "અન્તરેણ વિધિમ્" ઇતિ–
તદપ્યબુદ્ધિપૂર્વકમિવ નઃ પ્રતિભાતિ ।
યસ્માત્કાલાન્તરફલદાયિષુ કર્મસ્વેતદ્ઘટતે ।
આત્મલાભકાલ એવ ફલદાયિનિ ત્વાત્મજ્ઞાને
નૈતત્સમઞ્જસમિત્યાહ ।

જ્ઞાનાત્ફલે હ્યવાપ્તેઽસ્મિન્પ્રત્યક્ષે ભવઘાતિનિ ।
ઉપકારાય તન્નેતિ ન ન્યાય્યં ભાતિ નો વચઃ ॥ ૯૦॥

યદપિ જૈમિનીયં વચનમુદ્ઘાટયસિ – તદપિ
તદ્વિવક્ષાપરિજ્ઞાનાદેવોદ્ભાવ્યતે । કિં કારણમ્ । યતો ન
જૈમિનેરયમભિપ્રાય આમ્નાયઃ । સર્વ એવ ક્રિયાર્થ ઇતિ ।
યદિ હ્યયમભિપ્રાયોઽભવિષ્યત્ "અથાતો બ્રહ્મજિજ્ઞાસા ।
જન્માદ્યસ્ય યતઃ"
ઇત્યેવમાદિબ્રહ્મવસ્તુસ્વરૂપમાત્રયાથાત્મ્યપ્રકાશનપરં
ગમ્ભીરન્યાયસંદૃબ્ધં સર્વવેદાન્તાર્થમીમાંસનં
શ્રીમચ્છારીરકં નાસૂત્રયિષ્યત્ । અસૂત્રયચ્ચ ।
તસ્માજ્જૈમિનેરેવાયમભિપ્રાયો યથૈવ વિધિવાક્યાનાં
સ્વાર્થમાત્રે પ્રામાણ્યમેવમૈકાત્મ્યવાક્યાનામપ્યનધિગત-
વસ્તુપરિચ્છેદસામ્યાદિતિ । અત ઇદમભિધીયતે ।
અધિચોદનં ચ આમ્નાયસ્તસ્યૈવ સ્યાત્ક્રિયાર્થતા ।
તત્ત્વમસ્યાદિવાક્યાનાં બ્રૂત કર્માર્થતા કથમ્ ॥ ૯૧॥

અપિ ચ । ઐકાત્મ્યપક્ષ ઇવાદૃષ્ટાર્થકર્મસુ ભવત્પક્ષેઽપિ
પ્રવૃત્તિર્દુર્લક્ષ્યા । યતઃ ।
સ્વર્ગં યિયાસુર્જુહુયાદગ્નિહોત્રં યથાવિધિ ।
દેહાદ્વ્યુત્થાપિતસ્યૈવં કર્તૃત્વં જૈમિનેઃ કથમ્ ॥ ૯૨॥

ન ચ પ્રત્યાખ્યાતાશેષશરીરાદિકર્મસાધનસ્વભાવ-
સ્યાત્મમાત્રસ્ય કર્મસ્વધિકારઃ । યસ્માત્ ।
સર્વપ્રમાણાસમ્ભાવ્યો હ્યહંવૃત્ત્યૈકસાધનઃ ।
યુષ્મદર્થમનાદિત્સુર્જૈમિનિઃ પ્રેર્યતે કથમ્ ॥ ૯૩॥

પ્રવૃત્તિકારણાભાવાચ્ચ । યસ્માત્ ।
સુખદુઃખાદિભિર્યોગ આત્મનો નાહમેક્ષ્યતે ।
પરાક્ત્વાત્પ્રત્યગાત્મત્વાજ્જૈમિનિઃ પ્રેર્યતે કથમ્ ॥ ૯૪॥

કિંચ ।
ન તાવદ્યોગ એવાસ્તિ શરીરેણાત્મનઃ સદા ।
વિષયૈર્દૂરતો નાસ્તિ સ્વર્ગાદૌ સ્યાત્કથં સુખમ્ ॥ ૯૫॥

યસ્માદન્યથા નોપપદ્યતે ।

નરાભિમાનિનં તસ્માત્કારકાધ્યાત્મદર્શિનમ્ ।
મન્ત્ર આહોરરીકૃત્ય "કુર્વન્" ઇતિ ન નિર્દ્ધયમ્ ॥ ૯૬॥

"યચ્ચોક્તં વિરહય્ય" ઇતિ તદપિ ન સમ્યગેવ । તથાપિ
તુ ન યા કાચિત્ક્રિયા યત્ર ક્વ ચાધ્યાહરણીયા કિં તુ યા
યત્રાભિપ્રેતસમ્બન્ધં ઘટયિતું શક્નોત્યાકાઙ્ક્ષાં ચ
વાક્યસ્ય પૂરયતિ સૈવાધ્યાહરણીયા । એવંવિશિષ્ટા ચ
ક્રિયાસ્માભિરભ્યુપગતૈવ । સા તૂપાદિત્સિતવાક્યાર્થા-
વિરોધિન્યેવ નાભૂતાર્થપ્રાદુર્ભાવફલેતિ ।
ષડ્ભાવવિકારરહિતાત્મવસ્તુનો નિર્ધૂતાશેષ-
દ્વૈતાનર્થસ્યાપરાધીનપ્રકાશસ્ય
વિજિજ્ઞાપયિષિતત્વાદસ્યસ્મીત્યાદિક્રિયાપદં
સ્વમહિમસિદ્ધાર્થપ્રતિપાદનસમર્થમભ્યુપગન્તવ્યં ન
વિપરીતાર્થપ્રતિપાદનપરમિતિ ।
ધાવેદિતિ ન દાનાર્થે પદં યદ્વત્પ્રયુજ્યતે ।
એધીત્યાદિ તથા નેચ્છેત્સ્વતઃ સિદ્ધાર્થવાચિનિ ॥ ૯૭॥

ન ચ યથોક્તવસ્તુવૃત્તપ્રતિપાદનવ્યતિરેકેણ
તત્ત્વમસ્યાદિવાક્યં વાક્યાર્થાન્તરં વક્તીતિ
શક્યમધ્યવસાતુમિત્યાહ ।
તત્ત્વમસ્યાદિવાક્યાનાં સ્વતસ્સિદ્ધાર્થબોધનાત્ ।
અર્થાન્તરં ન સંદ્રષ્ટું શક્યતે ત્રિદશૈરપિ ॥ ૯૮॥

યસ્માદેવમ્ ।
અતઃ સર્વાશ્રમાણાં તુ વાઙ્મનઃકાયકર્મભિઃ ।
સ્વનુષ્ઠિતૈર્ન મુક્તિઃ સ્યાજ્જ્ઞાનાદેવ હિ સા યતઃ ॥ ૯૯॥

તસ્માચ્ચ કારણાદેતદપ્યુપપન્નમ્ ।
સ્વમનોરથસંક્લૃપ્તપ્રજ્ઞાધ્માતધિયામતઃ ।
શ્રોત્રિયેષ્વેવ વાચસ્તાઃ શોભન્તે નાત્મવેદિષુ ॥ ૧૦૦।
ઇતિ પ્રથમોઽધ્યાયઃ ॥ ૧॥

અથ દ્વિતીયોઽધ્યાયઃ ।
પ્રત્યક્ષાદીનામનેવંવિષયત્વાત્તેષાં સ્વારમ્ભક-
વિષયોપનિપાતિત્વાદાત્મનશ્ચાશેષપ્રમેયવૈલક્ષણ્યા-

ત્સર્વાનર્થૈકહેત્વજ્ઞાનાપનોદિજ્ઞાનદિવાકરોદયહેતુત્વં
વસ્તુમાત્રયાથાત્મ્યપ્રકાશનપટીયસસ્તત્ત્વમસ્યાદેર્વચસ
એવેતિ બહ્વીભિરુપપત્તિભિઃ પ્રદર્શિતમ્ ।
અતસ્તદર્થારતિપત્તૌ યત્કારણં તદપનયનાય
દ્વિતીયોઽધ્યાય આરભ્યતે ।
શ્રાવિતો વેત્તિ વાક્યાર્થં નચેત્તત્ત્વમસીત્યતઃ ।
ત્વમ્પદાર્થાનભિજ્ઞત્વાદતસ્તત્પ્રક્રિયોચ્યતે ॥ ૧॥

યોઽયમહમ્બ્રહ્મેતિ વાક્યાર્થસ્તત્પ્રતિપત્તિર્વાક્યાદેવેતિ
પ્રત્યક્ષાદીનામનેવંવિષયત્વાદિત્યવાદિષં તસ્ય
વિશુદ્ધ્યર્થમનૈકાન્તિકત્વં પૂર્વપક્ષત્વેનોપસ્થાપ્યતે ।
કૃત્સ્નાનાત્મનિવૃત્તૌ ચ કશ્ચિદાપ્નોતિ નિર્વૃતિમ્ ।
શ્રુતવાક્યસ્મૃતેશ્ચાન્યઃ સ્માર્યતે ચ વચોઽપરઃ ॥ ૨॥

એતત્પ્રસઙ્ગેન શ્રોત્રન્તરોપન્યાસમુભયત્રાપિ સમ્ભાવનાયાહ ।
વાક્યશ્રવણમાત્રાચ્ચ પિશાચકવદાપ્નુયાત્ ।
ત્રિષુ યાદૃચ્છિકી સિદ્ધિઃ સ્માર્યમાણે તુ નિશ્ચિતા ॥ ૩॥

નાયમનૈકાન્તિકો હેતુઃ । યતઃ ।
સર્વોઽયં મહિમા જ્ઞેયો વાક્યસ્યૈવ યથોદિતઃ ।
વાક્યાર્થં ન હ્યૃતે વાક્યાત્કશ્ચિજ્જાનાતિ તત્ત્વતઃ ॥ ૪॥

વાક્યં ચ પ્રતિપાદનાય પ્રવૃત્તં સત્પ્રતિપાદયત્યેવ
સર્વપ્રમાણાનામપ્યેવંવૃત્તત્વાત્ ।
નાહંગ્રાહ્યે ન તદ્ધીને ન પ્રત્યઙ્નાપિ દુઃખિનિ ।
વિરોધઃ સદસીત્યસ્માદ્વાક્યાભિજ્ઞસ્ય જાયતે ॥ ૫॥

નાવિરક્તસ્ય સંસારાન્નિવિવૃત્સા તતો ભવેત્ ।
ન ચાનિવૃત્તતૃષ્ણસ્ય પુરુષસ્ય મુમુક્ષુતા ॥ ૬॥

ન ચામુમુક્ષોરસ્તીહ ગુરુપાદોપસર્પણમ્ ।
ન વિના ગુરુસમ્બન્ધં વાક્યસ્ય શ્રવણં ભવેત્ ॥ ૭॥

તથા પદપદાર્થૌ ચ ન સ્તો વાક્યમૃતે ક્વચિત્ ।
અન્વયવ્યતિરેકૌ ચ તાવૃતે સ્તાં કૈમાશ્રયૌ ॥ ૮॥

અન્વયવ્યતિરેકાભ્યાં વિના વાક્યાર્થબોધનમ્ ।

ન સ્યાત્તેન વિનાજ્ઞાનપ્રહાણં નોપપદ્યતે ॥ ૯॥

વિનાજ્ઞાનપ્રહાણેન પુરુષાર્થઃ સુદુર્લભઃ ।
તસ્માદ્યથોક્તસિદ્ધ્યર્થં પરો ગ્રન્થોઽવતાર્યતે ॥ ૧૦॥

વર્ચસ્કં ત્વન્નકાર્યત્વાદ્યથા નાત્મેતિ ગમ્યતે ।
તદ્ભાગઃ સેન્દ્રિયો દેહસ્તદ્વત્કિમિતિ નેક્ષ્યતે ॥ ૧૧॥

આદ્યન્તયોરનાત્મત્વે પ્રસિદ્ધે મધ્યેઽપિ કઃ પ્રતિબન્ધઃ ।
પ્રાગનાત્મૈવ જગ્ધં સદાત્મતામેત્યવિદ્યયા ।
સ્રગાલેપનવદ્દેહં તસ્માત્પશ્યેદ્વિવિક્તધીઃ ॥ ૧૨॥

અથૈવમપિ મદ્વચનં નાદ્રિયસે સ્વયમેવૈતસ્માચ્છરીરાદ્-
અશુચિરાશેર્નિરાશો ભવિષ્યસિ ।
મન્યસે તાવદસ્મીતિ યાવદસ્માન્ન નીયસે ।
શ્વભિઃ ક્રોડીકૃતે દેહે નૈવં ત્વમભિમંસ્યસે ॥ ૧૩॥

શિર આક્રમ્ય પાદેન ભર્ત્સયત્યપરાન્ શુનઃ ।
દૃષ્ટ્વા સાધારણં દેહં કસ્માત્સક્તોઽસિ તત્ર ભોઃ ॥ ૧૪॥

શ્રુતિપરિપ્રાપિતોઽયમર્થોઽનાત્મા બુદ્ધ્યાદિદેહાન્ત ઇતીદમાહ ।
બુસવ્રીહિપલાલાંશૈર્બીજમેકં ત્રિધા યથા ।
બુદ્ધિમાંસપુરીષાંશૈરન્નં તદ્વદવસ્થિતમ્ ॥ ૧૫॥

યથોક્તાર્થપ્રતિપત્તૌ સત્યાં ન રાગદ્વેષાભ્યાં વિક્રિયતે
વિપશ્ચિદિત્યસ્યાર્થસ્ય પ્રતિપત્તયે દૃષ્ટાન્તઃ ।
વર્ચસ્કે સમ્પરિત્યક્તે દોષતશ્ચાવધારિતે ।
યદિ દોષં વદેત્તસ્મૈ કિં તત્રોચ્ચરિતુર્ભવેત્ ॥ ૧૬॥

તદ્વત્સૂક્ષ્મે તથા સ્થૂલે દેહે ત્યક્તે વિવેકતઃ ।
યદિ દોષં વદેત્તાભ્યાં કિં તત્ર વિદુષો ભવેત્ ॥ ૧૭॥

એતાવદેવ હ્યહં બ્રહ્માસ્મીતિ વાક્યાર્થાપ્રતિપત્તૌ કારણં
યદુત બુદ્ધ્યાદૌ દેહાન્તે હ્યહંમમેતિ નિસ્સન્ધિબન્ધનો ગ્રહઃ ।
તદ્વ્યતિરેકે હિ ન કુતશ્ચિદ્વિભજ્યત એકલ એવ પ્રત્યગાત્મ-
ન્યવતિષ્ઠત ઇત્યાહ ।
રિપૌ બન્ધૌ સ્વદેહે ચ સમૈકાત્મ્યં પ્રપશ્યતઃ ।
વિવેકિનઃ કુતઃ કોપઃ સ્વદેહાવયવેષ્વિવ ॥ ૧૮॥

ઇતશ્ચાનાત્મા દેહાદિઃ ।
ઘટાદિવચ્ચ દૃશ્યત્વાત્તૈરેવ કરણૈર્દૃશેઃ ।
સ્વપ્ને ચાનન્વયાજ્જ્ઞયો દેહોઽનાત્મેતિ સૂરિભિઃ ॥ ૧૯॥

દેહાદિકાર્યકરણસંઘાતવ્યતિરેકાવ્યતિરેકદર્શિનઃ
પ્રત્યક્ષત એવ વિરુદ્ધં કાર્યમુપલભ્યતે ।
ચતુર્ભિરુહ્યતે યત્તત્સર્વશક્ત્યા શરીરકમ્ ।
તૂલાયતે તદેવાહંધિયાઘ્રાતમચેતસામ્ ॥ ૨૦॥

પ્રસિદ્ધત્વાપ્રકરણાર્થોપસંહારાયાહ ।
સ્થૂલં યુક્ત્યા નિરસ્યૈવં નભસો નીલતામિવ ।
દેહં સૂક્ષ્મં નિરાકુર્યાદતો યુક્તિભિરાત્મનઃ ॥ ૨૧॥

કથં દેહં સૂક્ષ્મં નિરાકુર્યાદિતિ । ઉચ્યતે ।
અહંમમત્વયત્નેચ્છા નાત્મધર્માઃ કૃશત્વવત્ ।
કર્મત્વેનોપલભ્યત્વાદપાયિત્વાચ્ચ વસ્ત્રવત્ ॥ ૨૨॥

વૈધર્મ્યે દૃષ્ટાન્તઃ ।
નોષ્ણિમાનં દહત્યગ્નિઃ સ્વરૂપત્વાદ્યથા જ્વલન્ ।
તથૈવાત્માત્મનો વિદ્યાદહં નૈવાવિશેષતઃ ॥ ૨૩॥

એકસ્યાત્મનઃ કર્મકર્તૃભાવઃ સર્વથા નોપપદ્યત ઇતિ શ્રુત્વા
મીમાંસકઃ પ્રત્યવતિષ્ઠતે । અહમ્પ્રત્યયગ્રાહ્યત્વાદ્ગ્રાહક
આત્મેતિ તન્નિવૃત્ત્યર્થમાહ ।
યત્કર્મકો હિ યો ભાવો નાસૌ તત્કર્તૃકો યતઃ ।
ઘટપ્રત્યયવત્તસ્માન્નાહં સ્યાદ્દ્રષ્ટૃકર્મકઃ ॥ ૨૪॥

અત્રાહ પ્રત્યક્ષેણાત્મનઃ કર્મકર્તૃત્વાભ્યુપગમે
તત્પાદોપજીવિનાનુમાનેન પ્રત્યક્ષોત્સારણમયુક્તમિતિ
ચોદ્યં તન્નિરાકરણાય પ્રત્યક્ષોપન્યાસઃ ।
યત્ર યો દૃશ્યતે દ્રષ્ટા તસ્યૈવાસૌ ગુણો ન તુ ।
દ્રષ્ટૃસ્થં દૃશ્યતાં યસ્માન્નૈવેયાદ્દ્રષ્ટૃબોધવત્
॥ ૨૫॥

પ્રત્યક્ષેણૈવ ભવદભિમતસ્ય પ્રત્યક્ષસ્યાભાસીકૃતત્વાત્-
સુસ્થમેવાનુમાનમ્ । અતસ્તદેવ પ્રક્રિયતે તત્ર ચ
વિકલ્પદૂષણાભિધાનમ્ ।

નાત્મના ન તદંશેન ગુણઃ સ્વસ્થોઽવગમ્યતે ।
અભિન્નત્વાત્સમત્વાચ્ચ નિરંશત્વાદકર્મતઃ ॥ ૨૬॥

ન યુગપન્નપિ ક્રમેણોભયથા ચૈકસ્ય ધર્મિણો
ગ્રાહ્યગ્રાહકત્વમુપપદ્યેત ઇતિ પ્રતિપાદનાયાહ ।
દ્રષ્ટૃત્વેનોપયુક્તત્વાત્તદૈવ સ્યાન્ન દૃશ્યતા ।
કાલાન્તરે ચેદ્દૃશ્યત્વં ન હ્યદ્રષ્ટૃકમિષ્યતે ॥ ૨૭॥

સન્તુ કામમનાત્મધર્મા મમત્વાદયો
યથોક્તન્યાયબલાદનાત્મતયૈવ
ચ તેષુ વ્યવહારાદહંરૂપસ્ય તુ પ્રત્યગાત્મસમ્બન્ધિતયૈવ
પ્રસિદ્ધેરહમ્બ્રહ્માસ્મીતિ શ્રુતેશ્ચાનાત્મધર્મત્વમયુક્તમિતિ
ચેત્તન્ન ।
અહન્ધર્મસ્ત્વભિન્નશ્ચેદહમ્બ્રહ્મેતિ વાક્યતઃ ।
ગૌરોઽહમિત્યનૈકાન્તો વાક્યં તદ્વ્યપનેતૃ તત્ ॥ ૨૮॥

કથં વાક્યં તદ્વ્યપનેતૃ તદિતિ । ઉચ્યતે ।
યોઽયં સ્થાણુઃ પુમાનેષ પુન્ધિયા સ્થાણુધીરિવ ।
બ્રહ્માસ્મીતિધિયાશેષા હ્યહમ્બુદ્ધિર્નિવર્ત્યતે ॥ ૨૯॥

અહમ્પરિચ્છેદવ્યાવૃત્તૌ ન કિંચિદવ્યાવૃત્તં
દ્વૈતજાતમવશિષ્યતે
દ્વિતીયસમ્બન્ધસ્ય તન્મૂલત્વાત્ । અત આહ ।
નિવૃત્તાયામહમ્બુદ્ધૌ મમધીઃ પ્રવિલીયતે ।
અહમ્બીજા હિ સા સિદ્ધ્યેત્તમોઽભાવે કુતઃ ફણી ॥ ૩૦॥

વિવક્ષિતદૃષ્ટાન્તાંશજ્ઞાપનાય દૃષ્ટાન્તવ્યાખ્યા ।
તમોઽભિભૂતચિત્તો હિ રજ્જ્વાં પશ્યતિ રોષણમ્ ।
ભ્રાન્ત્યા ભ્રાન્ત્યા વિના તસ્માન્નોરગં સ્રજિ વીક્ષતે ॥ ૩૧॥

અનન્વયાચ્ચ નાત્મધર્મોઽહઙ્કારઃ ।
આત્મનશ્ચેદહન્ધર્મો યાયાન્મુક્તિસુષુપ્તયોઃ ।
યતો નાન્વેતિ તેનાયમન્યદીયો ભવેદહમ્ ॥ ૩૨॥

આત્મધર્મત્વાભ્યુપગમેઽપરિહાર્યદોષપ્રસક્તિશ્ચ ।
યદ્યાત્મધર્મોઽહઙ્કારો નિત્યત્વં તસ્ય બોધવત્ ।
નિત્યત્વે મોક્ષશાસ્ત્રાણાં વૈયર્થ્યં પ્રાપ્નુયાદ્ધ્રુવમ્ ॥

૩૩ ॥

સ્યાત્પરિહારઃ
સ્વાભાવિકધર્મત્વાભ્યુપગમેઽપ્યામ્રાદિફલવદિતિ
ચેત્તન્ન ।
આમ્રાદેઃ પરિણામિત્વાદ્ગુણહાનિર્ગુણાન્તરૈઃ ।
અવિકારિ તુ તદ્બ્રહ્મ ન હિ દ્રષ્ટુરિતિશ્રુતેઃ ॥ ૩૪ ॥

અહઙ્કારસ્ય ચાગમાપાયિત્વાત્તદ્ધર્મિણશ્ચાનિત્યત્વં
પ્રાપ્નોતિ ।
આગમાપાયિનિષ્ઠત્વાદનિત્યત્વમિયાદ્દૃશિઃ ।
ઉપયન્નપયન્ધર્મો વિકરોતિ હિ ધર્મિણમ્ ॥ ૩૫ ॥

અસ્ત્વનિત્યત્વં કમુપાલભેમહિ પ્રમાણોપપન્નત્વાદિતિ ચેત્તન્ન ।
સદાવિલુપ્તસાક્ષિત્વં સ્વતસ્સિદ્ધં ન પાર્યતે ।
અપહ્નોતું ઘટસ્યેવ કુશાગ્રીયધિયાત્મનઃ ॥ ૩૬ ॥

એતસ્માચ્ચ હેતોરહંકારસ્યાનાત્મધર્મત્વમવસીયતામ્ ।
પ્રમાણૈશ્ચાવગમ્યત્વાદ્ઘટાદિવદહંદૃશેઃ ।
યતો રાધિઃ પ્રમાણાનાં સ કથં તૈઃ પ્રસિધ્યતિ ॥ ૩૭ ॥

ધર્મધર્મિણોશ્ચેતરેતરવિરુદ્ધાત્મકત્વાદસઙ્ગતિઃ ।
ધર્મિણશ્ચ વિરુદ્ધત્વાન્ન દૃશ્યગુણસઙ્ગતિઃ ।
મારુતાન્દોલિતજ્વાલં શૈત્યં નાગ્નિં સિસૃપ્સતિ ॥ ૩૮ ॥

તસ્માદ્વિસ્રબ્ધમુપગમ્યતામ્ ।
દ્રષ્ટૃત્વં દૃશ્યતા ચૈવ નૈકસ્મિન્નેકદા ક્વચિત્ ।
દૃશ્યદૃશ્યો ન ચ દ્રષ્ટા દ્રષ્ટુર્દર્શી દૃશિર્ન ચ ॥

૩૯ ॥

સર્વસંવ્યવહારલોપશ્ચ પ્રાપ્નોતિ । યસ્માત્ ।
દ્રષ્ટાપિ યદિ દૃશ્યાયા આત્મેયાત્કર્મતાં ધિયઃ ।
યૌગપદ્યમદૃશ્યત્વં વૈયર્થ્યં ચાપ્નુયાચ્છ્રુતિઃ ॥ ૪૦ ॥

કુતઃ । યસ્માત્ ।
નાલુપ્તદૃષ્ટેર્દૃશ્યત્વં દૃશ્યત્વે દ્રષ્ટૃતા કુતઃ ।

સ્યાચ્ચેદ્દૃગેકં નિર્દૃશ્યં જગદ્વા સ્યાદસાક્ષિકમ્ ॥ ૪૧॥

ઉક્તયુક્તિં દૃઢીકર્તુમાગમોદાહરણોપન્યાસઃ ।
આર્તમન્યદ્દૃશેઃ સર્વં "નેતિ નેતીતિ" ચાસકૃત્ ।
વદન્તી નિર્ગુણં બ્રહ્મ કથં શ્રુતિરુપેક્ષ્યતે ॥ ૪૨॥

"મહાભૂતાન્યહંકાર" ઇત્યેતત્ક્ષેત્રમુચ્યતે ।
ન દૃશેર્દ્વૈતયોગોઽસ્તિ વિશ્વેશ્વરમતાદપિ ॥ ૪૩॥

અધુના પ્રકૃતાર્થોઽપસંહારઃ ।
એવમેતદ્ધિરુગ્જ્ઞેયં મિથ્યાસિદ્ધમનાત્મકમ્ ।
મોહમૂલં સુદુર્બોધં દ્વૈતં યુક્તિભિરાત્મનઃ ॥ ૪૪॥

કુતો મિથ્યાસિદ્ધત્વં દ્વૈતસ્યેતિ ચેત્ ।
ન પૃથઙ્નાત્મના સિદ્ધિરાત્મનોઽન્યસ્ય વસ્તુનઃ ।
આત્મવત્કલ્પિતસ્તસ્માદહંકારાદિરાત્મનિ ॥ ૪૫॥

તસ્માદજ્ઞાનવિજૃમ્ભિતમેતત્ ।
દૃશ્યાઃ શબ્દાદયઃ ક્લૃપ્તા દ્રષ્ટ ચ બ્રહ્મ નિર્ગુણમ્ ।
અહં તદુભયં બિભ્રદ્ભ્રાન્તિમાત્મનિ યચ્છતિ ॥૪૬॥

તત એવેયમભિન્નસ્યાત્મનો ભેદબુદ્ધિઃ ।
દૃગેકા સર્વભૂતેષુ ભાતિ દૃશ્યૈરનેકવત્ ।
જલભાજનભેદેન મયૂખસ્રગ્વિભેદવત્ ॥ ૪૭॥

યથોક્તાર્થસ્ય પ્રતિપત્તયે દૃષ્ટાન્તઃ ।
મિત્રોદાસીનશત્રુત્વં યથૈકસ્યાન્યકલ્પનાત્ ।
અભિન્નસ્ય ચિત્તેસ્તદ્વદ્ભેદોઽન્તઃકરણાશ્રયઃ ॥ ૪૮॥

અપહારો યથા ભાનોઃ સર્વતો જલપાત્રકૈઃ ।
તત્ક્રિયાકૃતિદેશાપ્તિસ્તથા બુદ્ધિભિરાત્મનઃ ॥ ૪૯॥

ન ચ વિરુદ્ધધર્મણામેકત્રાનુપપત્તિઃ ।
કલ્પિતાનામવસ્તુત્વાત્સ્યાદેકત્રાપિ સમ્ભવઃ ।
કમનીયાશુચિઃ સ્વાદ્વીત્યેકસ્યામિવ યોષિતિ ॥ ૫૦॥

ન ચાયં ક્રિયાકારકફલાત્મક આભાસ ઈષદપિ
પરમાર્થવસ્તુ સ્પૃશતિ તસ્ય મોહમાત્રોપાદાનત્વાત્ ।
અભૂતાભિનિવેશેન સ્વાત્માનં વઞ્ચયત્યયમ્ ।

અસત્યપિ દ્વિતીયેઽર્થે સોમશર્મપિતા યથા ॥ ૫૧॥

વસ્તુયાથાત્મ્યાનવબોધપટલાવનદ્ધાક્ષઃ સન્ ।
સુભ્રૂઃ સુનાસા સુમુખી સુનેત્રા ચારુહાસિની ।
કલ્પનામાત્રસંમોહાદ્રામેત્યાલિઙ્ગતેઽશુચિમ્ ॥ ૫૨॥

સર્વસ્યાનર્થજાતસ્ય જિહાસિતસ્ય મૂલમહંકાર એવ
તસ્યાત્મનાત્મોપરાગાત્ । ન તુ પરમાર્થત આત્મનોઽવિદ્યયા
તત્કાર્યેણ વા સમ્બધોઽભૂદસ્તિ ભવિષ્યતિ વા
તસ્યાપરિલિપ્તદૃષ્ટિસ્વાભાવ્યાત્ ।
દૃશ્યાનુરક્તં તદ્દ્રષ્ટૃ દૃશ્યં દ્રષ્ટ્રનુરઞ્જિતમ્ ।
અહંવૃત્ત્યોહયં રક્તં તન્નાશેઽદ્વૈતતાત્મનઃ ॥ ૫૩॥

ઇહ કેચિચ્ચોદયન્તિ યોઽયમન્વયવ્યતિરેકાભ્યામનાત્મત-
યોત્સારિતોઽહંકારો વાક્યાર્થપ્રતિપત્તયે સોઽયં વિપરીતાર્થઃ
સંવૃત્તો યસ્માદહં બ્રહ્માસ્મીતિ બ્રહ્માહમ્પદાર્થયોઃ
સામાનાધિકરણ્યશ્રવણાદનાત્માર્થેન સામાનાધિકરણ્યં
પ્રાપ્નોતિ । વક્તવ્યા ચ પ્રત્યગાત્મનિ તસ્ય વૃત્તિરિતિ સોચ્યતે
પ્રસિદ્ધલક્ષણાગુણવૃત્તિભિઃ ।
નાજ્ઞાસિષમિતિ પ્રાહ સુષુપ્તાદુત્થિતોઽપિ હિ ।
અયોદાહાદિવત્તેન લક્ષણં પરમાત્મનઃ ॥ ૫૪॥

પ્રત્યક્ત્વાદતિસૂક્ષ્મત્વાદાત્મદૃષ્ટ્યનુશીલનાત્ ।
અતો વૃત્તીર્વિહાયાન્યા હ્યહંવૃત્ત્યોપલક્ષતે ॥ ૫૫॥

આત્મના ચાવિનાભાવમથવા વિલયં વ્રજેત્ ।
ન તુ પક્ષાન્તરં યાયાદતશ્ચાહંધિયોચ્યતે ॥ ૫૬॥

કીદૃક્પુનર્વસ્તુ લક્ષ્યમ્ ।
નામાદિભ્યઃ પરો ભૂમા નિષ્કલોઽકારકોઽક્રિયઃ ।
સ એવાત્મવતામાત્મા સ્વતસ્સિદ્ધઃ સ એવ નઃ ॥ ૫૭॥

અજ્ઞાનોત્થબુદ્ધ્યાદિકર્તૃત્વોપાધિમાત્માનં
પરિગૃહ્યૈવાન્વયવ્યતિરેકાભ્યામહં સુખી દુઃખી
ચેત્યહંકારાદેરનાત્મધર્મત્વમુક્તં
કેવલાત્માભ્યુપગમેઽશક્યત્વાત્ફલાભાવાચ્ચ ।
અથેદાનીમવિદ્યાપરિકલ્પિતં સાક્ષિત્વમાશ્રિત્ય

કર્તૃત્વાદ્યશેષપરિણામપ્રતિષેધાયાહ ।
એષ સર્વધિયાં નૃત્તમવિલુપ્તૈકદર્શનઃ ।
વીક્ષતેઽવીક્ષમાણોઽપિ નિમિષત્તદ્ધ્રુવોઽધ્રુવમ્ ॥ ૫૮॥

નનુ સર્વસિદ્ધાન્તાનામપિ સ્વસ્વદૃષ્ટ્યપેક્ષયોપપન્નત્વા-
દિતરેતરદૃષ્ટ્યપેક્ષયા દુસ્સ્થિતસિદ્ધિકત્વાન્નૈકત્રાપિ
વિશ્વાસં પશ્યામો ન ચ સર્વતાર્કિકૈરદૂષિતં સમર્થિતં
સર્વતાર્કિકોપદ્રવાપસર્પણાય વર્ત્મ સમ્ભાવયામઃ ।
ઉચ્યતે । વિસ્રબ્ધૈઃ સમ્ભાવ્યતામનુભવમાત્રશરણત્વાત્-
સર્વતાર્કિકપ્રસ્થાનાનામ્ । તદભિધીયતે ।
ઇમં પ્રાશિકમુદ્દિશ્ય તર્કજ્વરભૃશાતુરાઃ ।
ત્વાચ્છિરસ્કવચોજાલૈર્મોહયન્તીતરેતરમ્ ॥ ૫૯॥

અત્રાપિ ચોદયન્તિ । અનુભવાત્મનોઽપિ વિક્રિયાભ્યુપગમેઽન-
ભ્યુપગમેઽપિ દોષ એવ । યસ્માદાહ ।
"વર્ષાતપાભ્યાં કિં વ્યોમ્નશ્ચર્મણ્યેવ તયોઃ ફલમ્ ।
ચર્મોપમશ્ચેત્સોઽનિત્યઃ ખતુલ્યશ્ચેદસત્સમઃ" ॥ ૬૦॥

બુદ્ધિજન્મનિ પુંસશ્ચ વિકૃતિર્યદ્યનિત્યતા ।
અથાવિકૃતિરેવાયં પ્રમાતેતિ ન યુજ્યતે ॥ ૬૧॥

અસ્ય પરિહારઃ ।
ઊર્ધ્વં ગચ્છતિ ધૂમે ખં ભિદ્યતે સ્વિન્ન ભિદ્યતે ।
ન ભિદ્યતે ચેત્સ્થાસ્નુત્વં ભિદ્યતે ચેદ્ભિદાસ્ય કા ॥ ૬૨॥

ઇત્યેતત્પ્રતિપત્ત્યર્થમાહ ।
અવિક્રિયસ્ય ભોક્તૃત્વં સ્યાદહમ્બુદ્ધિવિભ્રમાત્ ।
નૌયાનવિભ્રમાદ્યદ્વન્નગેષુ ગતિકલ્પનમ્ ॥ ૬૩॥

યથોક્તાર્થાવિષ્કરણાય દૃષ્ટાન્તાન્તરોપાદાનમ્ ।
યથા જાત્યમણેઃ શુભ્રા જ્વલન્તી નિશ્ચલા શિખા ।
સંનિધ્યસંનિધાનેષુ ઘટાદીનામવિક્રિયા ॥ ૬૪॥

અયમત્રાંશો વિવક્ષિત ઇતિ જ્ઞાપનાયાહ ।
યદવસ્થા વ્યનક્તીતિ તદવસ્થૈવ સા પુનઃ ।
ભણ્યતે ન વ્યનક્તીતિ ઘટાદીનામસંનિધૌ ॥ ૬૫॥

તત્ર ચ ।
સર્વધીવ્યઞ્જકસ્તદ્વત્પરમાત્મા પ્રદીપકઃ ।
સંનિધ્યસંનિધાનેષુ ધીવૃત્તિનામવિક્રિયઃ ॥ ૬૬॥

ન પ્રકાશક્રિયા કાચિદસ્ય સ્વાત્મનિ વિદ્યતે ।
ઉપચારાત્ક્રિયા સાસ્ય યઃ પ્રકાશસ્ય સંનિધિઃ ॥ ૬૭॥

મૈવં શઙ્કિષ્ઠાઃ સાંખ્યરાધ્યાન્તોઽયમિતિ । યતઃ ।
યથા વિશુદ્ધ આકાશે સહસૈવાભ્રમણ્ડલમ્ ।
ભૂત્વા વિલીયતે તદ્વદાત્મનીહાખિલં જગત્ ॥ ૬૮॥

તસ્માદેષ કૂટસ્થો ન દ્વૈતં મનાગપિ સ્પૃશતિ । યતઃ ।
શબ્દાદ્યાકારનિર્ભાસાઃ ક્ષણપ્રધ્વંસિનીર્દૃશા ।
નિત્યોઽક્રમદૃગાત્મૈકો વ્યાપ્નોતીવ ધિયોઽનિશમ્ ॥ ૬૯॥

એવં ચ સતિ બુદ્ધેઃ પરિણામિત્વં યુક્તમ્ ।
અતીતાનાગતેહત્યાન્યુગપત્સર્વગોચરાન્ ।
વેત્ત્યાત્મવન્ન ધીર્યસ્માત્તેનેયં પરિણામિની ॥ ૭૦॥

તતશ્ચૈતત્સિદ્ધમ્ ।
અપશ્યન્પશ્યતીં બુદ્ધિમશ ૃણ્વન્ શ ૃણ્વતીં તથા ।
નિર્યત્નોઽવિક્રિયોઽનિચ્છન્નિચ્છન્તીં ચાપ્યલુપ્તદૃક્ ॥ ૭૧॥

દ્વિષન્તીમદ્વિષન્નાત્મા કુપ્યન્તીં ચાપ્યકોપનઃ ।
નિર્દુઃખો દુઃખિનીં ચૈવ નિસ્સુખઃ સુખિનીમપિ ॥ ૭૨॥

અમુહ્યમાનો મુહ્યન્તીં કલ્પયન્તીમકલ્પયન્ ।
સ્મરન્તીમસ્મરંશ્ચૈવ શયાનામસ્વપન્મુહુઃ ॥ ૭૩॥

સર્વાકારાં નિરાકારઃ સ્વાર્થોઽસ્વાર્થાં નિરિઙ્ગનઃ ।
નિસ્ત્રિકાલસ્ત્રિકાલસ્થાં કૂટસ્થઃ ક્ષણભઙ્ગુરામ્ ॥ ૭૪॥

નિરપેક્ષશ્ચ સાપેક્ષાં પરાચીં પ્રત્યગદ્વયઃ ।
સાવધિં નિર્ગતેયત્તઃ સર્વદેહેષુ પશ્યતિ ॥ ૭૫॥

એતસ્માચ્ચ કારણાદયમર્થો વ્યવસીયતામ્ ।
દુઃખી યદિ ભવેદાત્મા કસ્સાક્ષી દુઃખિનો ભવેત્ ।
દુઃખિનઃ સાક્ષિતાયુક્તા સાક્ષિણો દુઃખિતા તથા ॥ ૭૬॥

પૂર્વસ્યૈવ વ્યાખ્યાનાર્થમાહ ।
નર્તે સ્યાદ્વિક્રિયાં દુઃખી સાક્ષિતા કા વિકારિણઃ ।
ધીવિક્રિયાસહસ્રાણાં સાક્ષ્યતોઽહમવિક્રિયઃ ॥ ૭૭॥

એવં સર્વસ્મિન્ વ્યભિચારિણ્યાત્મવસ્ત્વેવાવ્યભિચારીત્યનુભવતો
વ્યવસ્થાપનાયાહ ।
પ્રમાણતન્નિભેષ્વસ્યા નોચ્છિત્તિર્મમ સંવિદઃ ।
મત્તોઽન્યદ્રૂપમાભાતિ યત્તત્સ્યાત્ક્ષણભઙ્ગિ હિ ॥ ૭૮॥

ઉત્પત્તિસ્થિતિભઙ્ગેષુ કુમ્ભસ્ય વિયતો યથા ।
નોત્પત્તિસ્થિતિનાશાસ્સ્યુર્બુદ્ધેરેવં મમાપિ ચ ॥ ૭૯॥

સુખદુઃખસમ્બન્ધાનાં ચ પ્રત્યક્ષત્વાન્ન
શ્રદ્ધામાત્રગ્રાહ્યમેતત્ ।
સુખદુઃખાદિસમ્બન્ધાં યથા દણ્ડેન દણ્ડિનમ્ ।
રાધકો વીક્ષતે બુદ્ધિં સાક્ષી તદ્વદસંહતઃ ॥ ૮૦॥

એતસ્માચ્ચ હેતોર્ધિયઃ પરિણામિત્વં યુક્તમ્ ।
યેનૈવાસ્યા ભવેદ્યોગઃ સુખકુમ્ભાદિના ધિયઃ ।
તં વિદન્તી તદૈવાન્યં વેત્તિ નાતો વિકારિણી ॥ ૮૧॥

અસ્યાશ્ચ ક્ષણભઙ્ગરત્વે સ્વયમેવાત્મા સાક્ષી । ન હિ
કૂટસ્થાવબોધમન્તરેણ બુદ્ધેરેવાવિર્ભાવતિરોભાવાદિ-
સિદ્ધિરસ્તિ ।
પરિણામિધિયાં વૃત્તં નિત્યાક્રમદૃગાત્મના ।
ષડ્ભાવવિક્રિયામેતિ વ્યાપ્તં ખેનાઙ્કુરો યથા ॥ ૮૨॥

સત આત્મનશ્ચાવિકારિત્વે યુક્તિઃ ।
સ્મૃતિસ્વપ્નપ્રબોધેષુ ન કશ્ચિત્પ્રત્યયો ધિયઃ ।
દૃશાવ્યાપ્તોઽસ્ત્યતો નિત્યમવિકારી સ્વયંદૃશિઃ ॥ ૮૩॥

એવં તાવત્પરાભ્યુપગતપ્રક્રિયાપ્રસ્થાનેન
નિરસ્તાશેષવિકારૈકાત્મ્યં
પ્રતિપાદિતમુપપત્તિભિઃ । અથાધુના શ્રૌતીં
પ્રક્રિયામવલમ્બ્યોચ્યતે ।
અસ્તુ વા પરિણામોઽસ્ય દૃશેઃ કૂટસ્થરૂપતઃ ।
કલ્પિતોઽપિ મૃષૈવાસૌ દણ્ડસ્યેવાપ્સુ વક્રતા ॥ ૮૪॥

ષટ્સુ ભાવવિકારેષુ નિષિદ્ધેશ્વેવમાત્મનિ ।
દોષઃ કશ્ચિદિહાસક્તું ન શક્યસ્તાર્કિકશ્વભિઃ ॥ ૮૫॥

પ્રકૃતમેવોપાદાય બુદ્ધેઃ પરિણામિત્વમાત્મનશ્ચ
કૂટસ્થત્વં યુક્તિભિરુચ્યતે ।
પ્રત્યર્થં તુ વિભિદ્યન્તે બુદ્ધયો વિષયોન્મુખાઃ ।
ન ભિદાવગતેસ્તદ્વત્સર્વાસ્તાશ્ચિન્નિભા યતઃ ॥ ૮૬॥

સ્વસમ્બદ્ધાર્થ એવ ।
સાવશેષપરિચ્છેદિન્યત એવ ન કૃત્સ્નવિત્ ।
નો ચેત્પરિણમેદ્બુદ્ધિઃ સર્વજ્ઞા સ્વાત્મવદ્ભવેત્ ॥ ૮૭॥

અતોઽવગતેરેકત્વાત્ ।
ચણ્ડાલબુદ્ધેર્યદ્દૃષ્ટૃ તદેવ બ્રહ્મબુદ્ધિદૃક્ ।
એકં તદુભયોર્જ્યોતિર્ભાસ્યભેદાદનેકવત્ ॥ ૮૮॥

કસ્માત્ ।
અવસ્થાદેશકાલાદિભેદો નાસ્ત્યનયોર્યતઃ ।
તસ્માજ્જગદ્ધિયાં વૃત્તં જ્યોતિરેકં સદેક્ષતે ॥ ૮૯॥

સર્વદેહેષ્વાત્મૈકત્વે પ્રતિબુદ્ધપરમાર્થતત્ત્વસ્યા-
પ્યપ્રતિબુદ્ધદેહસમ્બદ્ધાદશેષદુઃખસમ્બન્ધ ઇતિ ચેત્તન્ન ।
બોધાત્પ્રાગપિ દુઃખિત્વં નાન્યદેહોત્થમસ્તિ નઃ ।
બોધાદૂર્ધ્વં કુતસ્તત્સ્યાદ્યત્ર સ્વગતમપ્યસત્ ॥ ૯૦॥

ન ચેયં સ્વમનીષિકેતિ ગ્રાહ્યમ્ । કુતઃ ।
શ્રુત્યવષ્ટમ્ભાત્ ।
શબ્દાદ્યાકારનિર્ભાસા હાનોપાદાનધર્મિણી ।
ભાસ્યેત્યાહ શ્રુતિર્દૃષ્ટિરાત્મનોઽપરિણામિનઃ ॥ ૯૧॥

કા ત્વસૌ શ્રુતિઃ ।
દૃષ્ટેર્દ્રષ્ટારમાત્માનં ન પશ્યેર્દૃશ્યમાનયા ।
વિજ્ઞાતારમરે કેન વિજાનીયાદ્ધિયાં પતિમ્ ॥ ૯૨॥

યસ્માત્સર્વપ્રમાણોપપન્નોઽયમર્થસ્તસ્માદતોઽન્યથાવાદિનો
જાત્યન્ધા ઇવાનુકમ્પનીયા ઇત્યાહ ।

તદેતદદ્વયં બ્રહ્મ નિર્વિકારં કુબુદ્ધિભિઃ ।
જાત્યન્ધગજદૃષ્ટ્યેવ કોટિશઃ પરિકલ્પ્યતે ॥ ૯૩॥

પ્રમાણોપપન્નસ્યાર્થસ્યાસમ્ભાવનાત્તદનુકમ્પનીયત્વસિદ્ધિઃ ।
તદેતદાહ ।
યદ્યદ્વિશેષણં દૃષ્ટં નાત્મનસ્તદનન્વયાત્ ।
ખસ્ય કુમ્ભાદિવત્તસ્માદાત્મા સ્યાન્નિર્વિશેષણઃ ॥ ૯૪॥

અતશ્ચાત્મનો ભેદાસંસ્પર્શો ભેદસ્ય મિથ્યાસ્વાભાવ્યાદત
આહ ।
અવગત્યાત્મનો યસ્માદાગમાપાયિ કુમ્ભવત્ ।
સાહંકારમિદં વિશ્વં તસ્માત્તત્સ્યાત્ક્ષ્યાદિવત્ ॥ ૯૫॥

સર્વસ્યૈવાનુમાનવ્યાપારસ્ય ફલમિયદેવ યદ્વિવેકગ્રહણમ્ ।
તદુચ્યતે ।
બુદ્ધેરનાત્મધર્મત્વમનુમાનાત્પ્રસિદ્ધ્યતિ ।
આત્મનોઽપ્યદ્વિતીયત્વમાત્મત્વાદેવ સિદ્ધ્યતિ ॥ ૯૬॥

યદ્યપ્યયં ગ્રહીતૃગ્રહણગ્રાહ્યગૃહીતિતત્ફલાત્મક
આબ્રહ્મસ્તમ્બપર્યન્તઃ સંસારોઽન્વયવ્યતિરેકાભ્યામનાત્મતયા
નિર્માલ્યવદપવિદ્ધઃ । તથાપિ તુ નૈવાસૌ સ્વતસ્સિદ્ધાત્મ-
વ્યતિરિક્તાનાત્મપ્રકૃતિપદાર્થવ્યપાશ્રયઃ સાંખ્યાનામિવ ।
કિં તર્હિ ।
સ્વતસ્સિદ્ધાનુદિતાનસ્તમિતકૂટસ્થાત્મપ્રજ્ઞાનમાત્ર-
શરીરપ્રતિબિમ્બિતાવિચારિતસિદ્ધાત્માનવબોધાશ્રય એવ
તદુપાદાનત્વાત્તસ્યેતીમમર્થં નિર્વક્તુકામ આહ ।
ઋતે જ્ઞાનં ન સન્ત્યર્થા અસ્તિ જ્ઞાનમૃતેઽપિ તાન્ ।
એવં ધિયો હિરુગ્જ્યોતિર્વિવિચ્યાદનુમાનતઃ ॥ ૯૭॥

યસ્માત્પ્રમાણપ્રમેયવ્યવહાર આત્માનવબોધાશ્રય
એવ તસ્માત્સિદ્ધમાત્મનોઽપ્રમેયત્વમ્ । નૈવ હિ કાર્યં
સ્વકારણમતિલઙ્ઘ્યાન્યત્રાકારક આસ્પદમુપનિબધ્નાતિ ।
અત આહ ।
વ્યવધીયન્ત એવામી બુદ્ધિદેહઘટાદયઃ ।
આત્મત્વાદાત્મનઃ કેન વ્યવધાનં મનાગપિ ॥ ૯૮॥

સ્વયમનવગમાત્મકત્વાદનવગમાત્મત્વં ચ
મોહમાત્રોપાદાનત્વાત્ ।
પ્રમાણમન્તરેણૈષાં બુદ્ધ્યાદીનામસિદ્ધતા ।
અનુભૂતિફલાર્થિત્વાદાત્મા જ્ઞઃ કિમપેક્ષતે ॥ ૯૯॥

વક્ષ્યમાણેતરેતરાધ્યાસસિદ્ધ્યર્થમુક્તવ્યતિરેકાનુવાદઃ ।
ઘટબુદ્ધેર્ઘટાચ્યર્થાદ્દ્રષ્ટુર્યદ્વદ્વિભિન્નતા ।
અહમ્બુદ્ધેરહઙ્ગમ્યાદ્દુઃખિનશ્ચ તથા દૃશેઃ ॥ ૧૦૦॥

એવમેતયોરાત્માનાત્મનોઃ સ્વતઃ પરતઃ સિદ્ધયોર્લૌકિકરજ્જુ-
સર્પાધ્યારોપવદવિદ્યોપાશ્રય એવેતરેતરાધ્યારોપ ઇત્યેતદાહ ।
અભ્રયાનં યથા મોહાચ્છશભૃત્યધ્યવસ્યતિ ।
સુખિત્વાદીન્ધિયો ધર્માંસ્તદ્વદાત્મનિ મન્યતે ॥ ૧૦૧ ॥

દગ્ધૃત્વં ચ યથા વહ્નેરયસો મન્યતે કુધીઃ ।
ચૈતન્યં તદ્વદાત્મીયં મોહાત્કર્તરિ મન્યતે ॥ ૧૦૨॥

સર્વ એવાયમાત્માનાત્મવિભાગઃ પ્રત્યક્ષાદિપ્રમાણવર્ત્મ-
ન્યુનપતિતોઽવિદ્યોત્સઙ્ગવર્ત્યેવ ન પરમાત્મવ્યપાશ્રયઃ ।
અસ્યાશ્ચાવિદ્યાયાઃ સર્વાનર્થહેતોઃ કુતો નિવૃત્તિરિતિ
ચેત્તદાહ ।
દુઃખરાશેર્વિચિત્રસ્ય સેયં ભ્રાન્તિશ્ચિરન્તની ।
મૂલં સંસારવૃક્ષસ્ય તદ્બાધસ્તત્ત્વદર્શનાત્ ॥ ૧૦૩॥

તદ્બાધસ્તત્ત્વદર્શનાદિતિ કુતઃ સમ્ભાવ્યત ઇતિ ચેદત
આહાગોપાલાવિપાલપણ્ડિતમિયમેવ પ્રસિદ્ધિઃ ।
અપ્રમોત્થં પ્રમોત્થેન જ્ઞાનં જ્ઞાનેન બાધ્યતે ।
અહિરજ્જ્વાદિવદ્બાધો દેહાદ્યાત્મમતેસ્તથા ॥ ૧૦૪॥

લૌકિકપ્રમેયવૈલક્ષણ્યાદાત્મનો નેહાનધિગતાધિગમઃ
પ્રમાણફલમ્ ।
અવિદ્યાનાશમાત્રં તુ ફલમિત્યુપચર્યતે ।
નાજ્ઞાતજ્ઞાપનં ન્યાય્યમવગત્યેકરૂપતઃ ॥ ૧૦૫॥

યસ્માદાત્માનવબોધમાત્રોપાદાનાઃ પ્રમાત્રાદયસ્તસ્માત્ ।
ન વિદન્ત્યાત્મનઃ સત્તાં દ્રષ્ટૃદર્શનગોચરાઃ ।
ન ચાન્યોન્યમતોઽમીષાં જ્ઞેયત્વં ભિન્નસાધનમ્ ॥ ૧૦૬॥

દ્રષ્ટ્રાદેરસાધારણરૂપજ્ઞાપનાયાહ ।
બાહ્ય આકારવાન્ ગ્રાહ્યો ગ્રહણં નિશ્ચયાદિમત્ ।
અન્વય્યહમિતિ જ્ઞેયઃ સાક્ષી ત્વાત્મા ધ્રુવઃ સદા ॥ ૧૦૭॥

સર્વકારકક્રિયાફલવિભાગાત્મકસંસારશૂન્ય આત્મેતિ
કારકક્રિયાફલવિભાગસાક્ષિત્વાદાત્મનસ્તદાહ ।
ગ્રાહકગ્રહણગ્રાહ્યવિભાગે યોઽવિભાગવાન્ ।
હાનોપાદાનયોસ્સાક્ષી હાનોપાદાનવર્જિતઃ ॥ ૧૦૮॥

ગ્રાહકાદિનિષ્ઠૈવ ગ્રાહકાદિભાવાભાવવિભાગસિદ્ધિઃ
કસ્માન્નેતિ ચેત્તદાહ ।
સ્વસાધન સ્વયં નષ્ટો ન નાશં વેત્ત્યભાવતઃ ।
અત એવ ન ચાન્યેષામતોઽસૌ ભિન્નસાક્ષિકઃ ॥ ૧૦૯॥

ગ્રાહકાદેરન્યસાક્ષિપૂર્વકત્વસિદ્ધેઃ
સ્વસાક્ષિણોઽપ્યન્યસાક્ષિપૂર્વકત્વા-
દનવસ્થેતિ ચેત્તન્ન સાક્ષિણો વ્યતિરિક્તહેત્વનપેક્ષત્વાદત
આહ ।
ધીવન્નાપેક્ષતે સિદ્ધિમાત્માન્યસ્માદવિક્રિયઃ ।
નિરપેક્ષમપેક્ષ્યૈવ સિધ્દન્ત્યન્યે ન તુ સ્વયમ્ ॥ ૧૧૦॥

યતો ગ્રાહકાદિષ્વાત્મભાવોઽવિદ્યાનિબન્ધન એવ
તસ્માદન્વયવ્યતિરેકાભ્યાં વિભજ્યાનાત્મનઃ સ્વયમ્ ।
ઉત્પત્તિસ્થિતિનાશેષુ યોઽવગત્યૈવ વર્તતે ।
જગતોઽવિકારયાવેહિ તમસ્મીતિ ન નશ્વરમ્ ॥ ૧૧૧॥

સ્વતસ્સિદ્ધાત્મચૈતન્યપ્રતિબિમ્બિતાવિચારિતસિદ્ધિકાત્માનવ-
બોધોત્થેતરેતરસ્વભાવાપેક્ષસિદ્ધત્વાત્સ્વતશ્ચાસિદ્ધે-
રનાત્મનો દ્વૈતેન્દ્રજાલસ્ય ।
ન સ્વયં સ્વસ્ય નાનાત્વં નાવગત્યાત્મના યતઃ ।
નોભાભ્યામપ્યતસ્સિદ્ધમદ્વૈતં દ્વૈતબાધયા ॥ ૧૧૨॥

યથોક્તાર્થપ્રતિપત્તિદ્રઢિમ્ને શ્રુત્યુદાહરણોપન્યાસઃ ।
નિત્યાવગતિરૂપત્વાત્કારકાદિર્ન ચાત્મનઃ ।
અસ્થૂલં નેતિનેતીતિ ન જાયત ઇતિ શ્રુતિઃ ॥ ૧૧૩॥

સર્વસ્યાસ્ય ગ્રાહકાદેર્દ્વૈતપ્રપઞ્ચસ્યાત્માનવબોધ-
માત્રોપાદાનસ્ય સ્વયં સેદ્ધુમશક્યત્વાદાત્મસિદ્ધેશ્ચા-
નુપાદેયત્વાત્ ।
આત્મનશ્ચેન્નિવાર્યન્તે બુદ્ધિદેહઘટાદયઃ ।
ષષ્ઠગોચરકલ્પાસ્તે વિજ્ઞેયાઃ પરમાર્થતઃ ॥ ૧૧૪॥

કુતો ન્યાયબલાદેવં નિશ્ચિતં પ્રતીયતે । યસ્માત્ ।
નિત્યાં સંવિદમાશ્રિત્ય સ્વતસ્સિદ્ધામવિક્રિયામ્ ।
સિદ્ધ્યન્તે ધિયો બોધાસ્તાંશ્ચાશ્રિત્ય ઘટાદયઃ ॥ ૧૧૫॥

યસ્માન્ન કયાચિદપિ યુક્ત્યાત્મનઃ કારકત્વં ક્રિયાત્વં
ફલત્વં ચોપપદ્યતે તસ્માદાત્મવસ્તુયાથાત્મ્યાનવબોધ-
માત્રોપાદાનત્વાન્નભસીવ રજોધૂમતુષાર નીહારનીલ-
ત્વાદ્યધ્યાસો યથોક્તાત્મનિ સર્વોઽયં ક્રિયાકારકફલાત્મક-
સંસારોઽહંમમત્વયત્નેચ્છાદિમિથ્યાધ્યાસ એવેતિ
સિદ્ધમિમમર્થમાહ ।
અહંમિથ્યાભિશાપેન દુઃખ્યાત્મા તદ્બુભુત્સયા ।
ઇતઃ શ્રુતિં તયા નેતીત્યુક્તઃ કૈવલ્યમાસ્થિતઃ ॥ ૧૧૬॥

તસ્યાસ્ય મુમુક્ષોઃ શ્રૌતાદ્વચસઃ
સ્વપ્નનિમિત્તોત્સારિતનિદ્રસ્યેવેયં
નિશ્ચિતાર્થા પ્રમા જાયતે ।
નાહં ન ચ મમાત્મત્વાત્સર્વદાનાત્મવર્જિતઃ ।
ભાનાવિવ તમોધ્યાસોઽપહ્નવશ્ચ તથા મયિ ॥ ૧૧૭॥

સોઽયમેવમ્પ્રતિપાન્નસ્વભાવમાત્માનં પ્રતિપન્નોઽનુક્રોશતિ ।
યત્ર ત્વસ્યેતિ સાટોપં કૃત્સ્નદ્વૈતનિષેધિનીમ્ ।
પ્રોત્સારયન્તીં સંસારમપ્યશ્રૌષં ન કિં શ્રુતિમ્ ॥ ૧૧૮॥

ઇત્યોમિત્યવબુદ્ધાત્મા નિષ્કલોઽકારકોઽક્રિયઃ ।
વિરક્ત ઇવ બુદ્ધ્યાદેરેકાકિત્વમુપેયિવાન્ ॥ ૧૧૯॥

ઇતિ દ્વિતીયોઽધ્યાયઃ ॥ ૨॥

અથ તૃતીયોઽધ્યાયઃ ।
સર્વોઽયં પ્રમિતિપ્રમાણપ્રમેયપ્રમાતૃલક્ષણ
આબ્રહ્મસ્તમ્બપર્યન્તો મિથ્યાધ્યાસ એવેતિ બહુશ

ઉપપત્તિભિરતિક્ષિપમ્ । આત્મા ચ
જન્માદિષડ્ભાવવિકારવર્જિતઃ
કૂટસ્થબોધ એવેતિ સ્ફુટીકૃતમ્ । તયોશ્ચ
મિથ્યાધ્યાસકૂટસ્થાત્મનોર્નાન્તરેણાજ્ઞાનં
સમ્બન્ધોઽન્યત્ર ચોદનાપરિપ્રાપિતાત્ યથા
"ઇયમેવર્ગગ્નિઃ સામ" ઇતિ । તચ્ચાજ્ઞાનં
સ્વાત્મમાત્ર નિમિત્તં ન સમ્ભવતીતિ
કસ્યચિત્કસ્મિંશ્ચિદ્વિષયે
ભવતીત્યભ્યુપગન્તવ્યમ્ । ઇહ ચ પદાર્થદ્વયં
નિર્દ્ધારિતમાત્માનાત્મા ચ ।
તત્રાનાત્મનસ્તાવન્નાજ્ઞાનેનાભિસમ્બન્ધઃ । તસ્ય હિ
સ્વરૂપમેવાજ્ઞાનં ન હિ સ્વતોઽજ્ઞાનસ્યાજ્ઞાનં ઘટતે ।
સમ્ભવદપ્યજ્ઞાનસ્વભાવેઽજ્ઞાનં કમતિશયં જનયેત્ ।
ન ચ તત્ર જ્ઞાનપ્રાપ્તિરસ્તિ યેન તત્પ્રતિષેધાત્મકમજ્ઞાનં
સ્યાત્ । અનાત્મનશ્ચાજ્ઞાનપ્રસૂતત્ત્વાત્ ।
ન હિ પૂર્વસિદ્ધં સત્તતોલબ્ધાત્મલાભસ્ય સેત્સ્યત
આશ્રયસ્યાશ્રયિ સમ્ભવતિ । તદનપેક્ષસ્ય ચ તસ્ય
નિસ્સ્વભાવત્વાત્ । એતેભ્ય એવ હેતુભ્યો
નાનાત્મવિષયમજ્ઞાનં
સમ્ભવતીતિ ગ્રાહ્યમ્ । એવં તાવન્નાનાત્મનોઽજ્ઞાનિત્વં
નાપિ
તદ્વિષયમજ્ઞાનમ્ । પારિશેષ્યાદાત્મન એવાસ્ત્વજ્ઞાનં
તસ્યાજ્ઞોઽસ્મીત્યનુભવદર્શનાત્ । "સોઽહં ભગવો
મન્ત્રવિદેવાસ્મિ નાત્મવિત્" ઇતિ શ્રુતેઃ ।
ન ચાત્મનોઽજ્ઞાનસ્વરૂપતા તસ્ય ચૈતન્યમાત્રસ્વાભાવ્યા-
દતિશયશ્ચ સમ્ભવતિ જ્ઞાનવિપરિલોપો જ્ઞાનપ્રાપ્તેશ્ચ
સમ્ભવસ્તસ્ય જ્ઞાનકારિત્વાત્ । ન ચ અજ્ઞાનકાર્યત્વં
કૂટસ્થાત્મસ્વાભાવ્યાદજ્ઞાનાનપેક્ષસ્ય ચાત્મનઃ સ્વત એવ
સ્વરૂપસિદ્ધેર્યુક્તમાત્મન એવાજ્ઞત્વમ્ । કિંવિષયં
પુનસ્તદાત્મનોઽજ્ઞાનમ્ । આત્મવિષયમિતિ બ્રૂમઃ ।
નન્વાત્મનોઽપિ જ્ઞાનસ્વરૂપત્વાદનન્યત્વાચ્ચ

જ્ઞાનપ્રકૃતિત્વાદિભ્યશ્ચ હેતુભ્યો નૈવાજ્ઞાનં ઘટતે ।
ઘટત એવ । કથમ્ ।
અજ્ઞાનમાત્રનિમિત્તત્વાત્તદ્વિભાગસ્ય સર્પાત્મતેવ રજ્જ્વાઃ ।
તસ્માત્તદપનુત્તૌ દ્વૈતાનર્થાભાવઃ । તદપનોદશ્ચ
વાક્યાદેવ તત્પદપદાર્થાભિજ્ઞસ્ય ।
અતો વાક્યવ્યાખ્યાનાયાધ્યાય આરભ્યતે । તત્ર યથોક્તેન
પ્રકારેણ તત્ત્વમસ્યાદિવાક્યોપનિવિષ્ટપદપદાર્થયોઃ
કૃતાન્વયવ્યતિરેકઃ ।
યદા ના તત્ત્વમસ્યાદેર્બ્રહ્માસ્મીત્યવગચ્છતિ ।
પ્રધ્વસ્તાહંમમો નૈતિ તદા ગીર્મનસોઃ સૃતિમ્ ॥ ૧॥

યદૈવ તદર્થં ત્વમર્થેઽવૈતિ તદૈવાવાક્યાર્થતાં
પ્રતિપદ્યતે ગીર્મનસોઃ સૃતિં ન પ્રતિપદ્યત ઇતિ । કુત
એતદ્ધ્યવસીયતે । યસ્માત્ ।
તત્પદં પ્રકૃતાર્થં સ્યાત્ત્વમ્પદં પ્રત્યગાત્મનિ ।
નીલોત્પલવદેતાભ્યાં દુઃખ્યનાત્મત્વવારણે ॥ ૨॥

એવં કૃતાન્વયવ્યતિરેકો વાક્યાદેવાવાક્યાર્થં પ્રતિપદ્યત
ઇત્યુક્તમતસ્તદ્વ્યાખ્યાનાય સૂત્રોપન્યાસઃ ।
સામાનાધિકરણ્યં ચ વિશેષણવિશેષ્યતા ।
લક્ષ્યલક્ષણસમ્બન્ધઃ પદાર્થપ્રત્યગાત્મનામ્ ॥ ૩॥

અસ્મિન્ સૂત્ર ઉપન્યસ્તે કશ્ચિચ્ચોદયતિ યોઽયં
વાક્યાર્થપ્રતિપત્તૌ પૂર્વાધ્યાયેનાન્વયવ્યતિરેકલક્ષણો
ન્યાયઃ સર્વકર્મસંન્યાસપૂર્વકોઽભિહિતઃ કિમયં
વિધિપરિપ્રાપિતઃ કિં વા સ્વરસત એવાત્ર
પુમાન્પ્રવર્તત ઇતિ । કિંચાતઃ । શૃણુ ।
યદ્યાત્મવસ્તુસાક્ષાત્કરણાય વિધિપરિપ્રાપિતોઽયં
ન્યાયસ્તદાવશ્યમાત્મવસ્તુસાક્ષાત્કરણાય
વ્યાવૃત્તશુભાશુભકર્મરાશિરેકાગ્રમના
અન્વયવ્યતિરેકાભ્યાં યથોક્તાભ્યામાત્મદર્શનં કરોતિ ।
અપરિસમાપ્યાત્મદર્શનં તતઃ પ્રચ્યવમાન આરૂઢપતિતો
ભવતિ । યદિ પુનર્યદૃચ્છાતઃ પ્રવર્તતે તદા ન
કશ્ચિદ્દોષ ઇતિ । વિધિપરિપ્રાપિત ઇતિ બ્રૂમો યત આહ ।

શમાદિસાધનઃ પશ્યેદાત્મન્યાત્માનમઞ્જસા ।
અન્વયવ્યતિરેકાભ્યાં ત્યક્ત્વા યુષ્મદશેષતઃ ॥ ૪॥

યુષ્મદર્થે પરિત્યક્તે પૂર્વોક્તૈર્હેતુભિઃ શ્રુતિઃ ।
વીક્ષાપન્નસ્ય કોઽસ્મીતિ તત્ત્વમિત્યાહ સૌહૃદાત્ ॥ ૫॥

અત્રાપિ ચોદયન્તિ સાંખ્યાઃ । શરીરેન્દ્રિયમનોબુદ્ધિ-
ષ્વનાત્મસ્વાત્મેતિ નિસ્સન્ધિબન્ધનં મિથ્યાજ્ઞાનમજ્ઞાનં
તન્નિબન્ધનો હ્યાત્મનોઽનેકાનર્થસમ્બન્ધસ્તસ્ય
ચાન્વયવ્યતિરેકાભ્યામેવ નિરસ્તત્ત્વાન્નિર્વિષયં
તત્ત્વમસ્યાદિવાક્યં પ્રાપ્તમ્ । તસ્માદ્વાક્યસ્ય ચૈષ
મહિમા યોઽયમાત્માનાત્મનોર્વિભાગ ઇતિ ।
તન્નિરાકરણાયેદમુચ્યતે ।
ભેદસંવિદિદં જ્ઞાનં ભેદાભાવશ્ચ સાક્ષિણિ ।
કાર્યમેતદવિદ્યાયા જ્ઞાત્મના ત્યાજયેદ્વચઃ ॥ ૬॥

જ્ઞાત્મના ત્યાજયેદ્વચ ઇત્યુપશ્રુત્યાહ કશ્ચિત્ ।
મિથ્યાજ્ઞાનવ્યતિરેકેણાત્માનવબોધસ્યાભાવાત્કિં
વાક્યેન નિવર્તતે । અજ્ઞાનં હિ નામ જ્ઞાનાભાવસ્તસ્ય
ચાવસ્તુસ્વાભાવ્યાત્કુતઃ સંસારકારણત્વં ન હ્યસતઃ
સજ્જન્મેષ્યતે "કુતસ્તુ ખલુ સોમ્યૈવં સ્યાત્" ઇતિ
"કથમસતઃ સજ્જાયેત" ઇતિ શ્રુતેરિતિ । અત્રોચ્યતે ।
અજ્ઞાત એવ સર્વોઽર્થઃ પ્રાગ્યતો બુદ્ધિજન્મનઃ ।
એકેનૈવ સતા સંશ્ચ સન્નજ્ઞાતો ભવેત્તતઃ ॥ ૭॥

સન્નજ્ઞાતો ભવેત્તત ઇત્યુક્તમધસ્તતેન શ્લોકેન ।
કોઽસૌ સન્નજ્ઞાત ઇત્યપેક્ષાયાં તત્સ્વરૂપપ્રતિપાદનાયાહ ।
પ્રમિત્સાયાં ય આભાતિ સ્વયં માતૃપ્રમાણયોઃ ।
સ્વમહિમ્ના ચ યસ્સિદ્ધઃ સોઽજ્ઞાતાર્થોઽવસીયતામ્ ॥ ૮॥

અત્ર કેચિદાહુઃ । યત્કિંચિદિહ વાક્યં લૌકિકં વૈદિકં વા
તત્સર્વં સંસર્ગાત્મકમેવ વાક્યાર્થં ગમયતિ ।
અતસ્તત્ત્વમસ્યાદિવાક્યેભ્યઃ સંસર્ગાત્મકમહં બ્રહ્મેતિ
વિજ્ઞાય તાવન્નિદિધ્યાસીત યાવદવાક્યાર્થાત્મકઃ
પ્રત્યગાત્મવિષયોઽવબોધોઽહં બ્રહ્મેતિ સમભિજાયતે ।

તસ્માદેવ વિજ્ઞાનાત્કૈવલ્યમાપ્નોતીતિ
તન્નિરાકરણાયેદમુચ્યતે ।
સામાનાધિકરણ્યાદેર્ઘટેતરખયોરિવ ।
વ્યાવૃત્તેઃ સ્યાદવાક્યાર્થઃ સાક્ષાન્નસ્તત્ત્વમર્થયોઃ ॥ ૯॥

કુતોઽવાક્યાર્થોઽવસીયત ઇતિ ચેત્તત્પ્રતિપત્ત્યર્થં
વિશેષણવિશેષ્યયોઃ સામર્થ્યોક્તિઃ ।
નિર્દુઃખિત્વં ત્વમર્થસ્ય તદર્થેન વિશેષણાત્ ।
પ્રત્યક્ત્તા ચ તદર્થસ્ય ત્વમ્પદેનાસ્ય સંનિધેઃ ॥ ૧૦॥

ઉક્તં સામાનાધિકરણ્યં વિશેષણવિશેષ્યભાવશ્ચ
સંક્ષેપતોઽથ લક્ષ્યલક્ષણવ્યાખ્યાનાયાહ ।
કૂટસ્થબોધપ્રત્યક્ત્વમનિમિત્તં સદાત્મનઃ ।
બોદ્ધૃતાહન્તયોર્હેતુસ્તાભ્યાં તેનોપલક્ષ્યતે ॥ ૧૧॥

બુદ્ધેઃ કૂટસ્થબોધપ્રત્યક્ત્વનિમિત્તે બોદ્ધૃતાપ્રત્યક્ત્વે
યે ત્વસાધારણે તયોર્વિશેષવચનમ્ ।
બોદ્ધૃતા કર્તૃતા બુદ્ધેઃ કર્મતા સ્યાદહન્તયા ।
તયોરૈક્યં યથા બુદ્ધૌ પૂર્વયોરેવમાત્મનિ ॥ ૧૨॥

યથા બુદ્ધૌ પૂર્વયોરેવમાત્મનીત્યતિદેશેન બુદ્ધિસાધર્મ્ય-
વિધાનાન્નાનાત્વપ્રસક્તૌ તદપવાદાર્થમાહ ।
ધર્મધર્મિત્વભેદોઽસ્યાઃ સોઽપિ નૈવાત્મનો યતઃ ।
પ્રત્યગ્જ્યોતિરતોઽભિન્નં ભેદહેતોરસમ્ભવાત્ ॥ ૧૩॥

ભેદહેતસમ્ભવં દર્શયન્નાહ ।
ન કસ્યાંચિદવસ્થાયાં બોધપ્રત્યક્ત્વયોર્ભિદા ।
વ્યભિચારોઽથવા દૃષ્ટો યથાહન્તદ્ધિદોસ્સદા ॥ ૧૪॥

યસ્માદજ્ઞાનોપાદાનાયા એવ બુદ્ધેર્ભેદો
નાત્મનસ્તસ્માદેતત્સિદ્ધમ્ ।
કૂટસ્થબોધતોઽદ્વૈતં સાક્ષાત્ત્વં પ્રત્યગાત્મનઃ ।
કૂટસ્થબોધાદ્બોદ્ધ્રી ધીઃ સ્વતો હીયં વિનશ્વરી ॥ ૧૫॥

અથાધુના પ્રકૃતસ્યૈવ પરિણામિનઃ કૂટસ્થસ્ય ચ
લક્ષણમુચ્યતે ।
વિશેષં કંચિદાશ્રિત્ય યત્સ્વરૂપં પ્રતીયતે ।

પ્રત્યભિજ્ઞાપ્રમાણેન પરિણામી સ દેહવત્ ॥ ૧૬॥

સામાન્યાચ્ચ વિશેષાચ્ચ સ્વમહિમ્નૈવ યો ભવેત્ ।
વ્યુત્થાયાપ્યવિકારી સ્યાત્કુમ્ભાકાશાદિવત્તુ સઃ ॥ ૧૭॥

આત્મનો બુદ્ધેશ્ચ બોધપ્રત્યગાત્મત્વમભિહિતં
તયોરસાધારણલક્ષણાભિધાનાર્થમાહ ।
બુદ્ધેર્યત્પ્રત્યગાત્મત્વં તત્સ્યાદ્દેહાદ્યુપાશ્રયાત્ ।
આત્મનસ્તુ સ્વરૂપં તન્નભસઃ સુષિતા યથા ॥ ૧૮॥

બોદ્ધૃત્વં તદ્વદેવાસ્યાઃ પ્રત્યયોત્પત્તિહેતુતઃ ।
આત્મનસ્તુ સ્વરૂપં તત્તિષ્ઠન્તીવ મહીભૃતઃ ॥ ૧૯॥

તયોઃ કૂટસ્થપરિણામિનોરાત્માનવબોધ એવ સમ્બન્ધહેતુર્ન
પુનર્વાસ્તવઃ કશ્ચિદપિ સમ્બન્ધ ઉપપદ્યત ઇત્યાહ ।
સમ્યક્સંશયમિથ્યાત્વૈર્ધીરિવેયં વિભજ્યતે ।
હાનોપાદાનતામીષાં મોહાદધ્યસ્યતે દૃશૌ ॥ ૨૦॥

કુતઃ કૂટસ્થાત્મસિદ્ધિરિતિ ચેદ્યતઃ ।
ન હાનં હાનમાત્રેણ નોદયોઽપીયતા યતઃ ।
તત્સિદ્ધિઃ સ્યાત્તુ તદ્ધીને હાનાદાનવિધર્મકે ॥ ૨૧॥

એવમ્ ।
આગમાપાયિહેતુભ્યાં ધૂત્વા સર્વાનનાત્મનઃ ।
તતસ્તત્ત્વમસીત્યેતદ્ધન્ત્યસ્મદિ નિજં તમઃ ॥ ૨૨॥

ઇત્યાદિ પુનઃપુનરુચ્યતે ગ્રન્થલાઘવાદ્બુદ્ધિલાઘવં
પ્રયોજકમિતિ । તત્ર યદ્યપિ તત્ત્વમસ્યાદિવાક્યાદુપાદિ-
ત્સિતાદ્વિતીયાત્માર્થવત્પારોક્ષ્યસદ્વિતીયાર્થઃ પ્રતીયતે ।
તથાપિ તુ નૈવાસાવર્થઃ શ્રુત્યા તાત્પર્યેણ
પ્રતિપિપાદયિષિતઃ પ્રાગપેતસ્ય પ્રતીતત્વાદિતીમમર્થમાહ ।
તદિત્યેતત્પદં લોકે બહ્વર્થપ્રતિપાદકમ્ ।
અપરિત્યજ્ય પારોક્ષ્યમભિધાનોત્થમેવ તત્ ॥ ૨૩॥

ત્વમિત્યપિ પદં તદ્વત્સાક્ષાન્માત્રાર્થવાચિ તુ ।
સંસારિતામસંત્યજ્ય સાપિ સ્યાદભિધાનજા ॥ ૨૪॥

વિરુદ્ધોદ્દેશનત્વાચ્ચ

પારોક્ષ્યદુઃખિત્વયોરવિવક્ષિતત્વમિત્યાહ ।
ઉદ્દિશ્યમાનં વાક્યસ્થં નોદ્દેશનગુણાત્વિતમ્ ।
આકાઙ્ક્ષિતપદાર્થેન સંસર્ગં પ્રતિપદ્યતે ॥ ૨૫॥

યત એતદેવમતોઽનુપાદિત્સિતયોરપિ
તત્ત્વમર્થયોર્વિશેષણવિશેષ્યભાવો
ભેદસંસર્ગરહિતવાક્યાર્થલક્ષણાયૈવેત્યુપસંહારઃ ।
તદ્દો વિશેષણાર્થત્વં વિશેષ્યત્વં ત્વમસ્તથા ।
લક્ષ્યલક્ષણસમ્બન્ધસ્તયોઃ સ્યાત્પ્રત્યગાત્મના ॥ ૨૬॥

કથં પુનરવિવક્ષિતવિરુદ્ધનિરસ્યમાનસ્ય લક્ષણાર્થત્વમ્ ।
લક્ષણં સર્પવદ્રજ્જ્વાઃ પ્રતીચઃ સ્યાદહં તથા ।
તદ્બાધેનૈવ વાક્યાર્થં વેત્તિ સોઽપિ તદાશ્રયાત્ ॥ ૨૭॥

ઇયં ચાવાક્યાર્થપ્રતિપત્તિરન્વયવ્યતિરેકાભિજ્ઞસ્યૈવ ।
યસ્માત્ ।
યાવદ્યાવન્નિરસ્યાયં દેહાદીન્પ્રત્યગઞ્ચતિ ।
તાવત્તાવત્તદર્થોઽપિ ત્વમર્થં પ્રવિવિક્ષતિ ॥ ૨૮॥

કસ્માત્પુનઃ કારણાદ્દેહાદ્યનાત્મત્વપ્રતિપત્તાવેવાત્મા
તદર્થમાત્મત્વેનાભિલિઙ્ગતે ન વિપર્યય ઇતિ । ઉચ્યતે ।
પ્રત્યગાત્માનવબોધસ્યનાત્મસ્વાભાવ્યાત્તદભિનિર્વૃત્તશ્ચાયં
બુદ્ધ્યાદિદેહાન્તસ્તસ્મિન્નાત્મત્વમવિદ્યાકૃતમેવાત્મત્વમિવાના-
ત્મત્વમપિ સાવિદ્યસ્યૈવ । યતો નિરવિદ્યો વિદ્વાનવાક્યાર્થરૂપ
એવ કેવલોઽવશિષ્યતે તસ્માદુચ્યતે ।
દેહાદિવ્યવધાનત્વાત્તદર્થં સ્વયમપ્યતઃ ।
પારોક્ષ્યેણૈવ જાનાતિ સાક્ષાત્ત્વં તદનાત્મનઃ ॥ ૨૯॥

યથોક્તાર્થપ્રતિપત્તિસૌકર્યાય દૃષ્ટાન્તોપાદાનામ્ ।
પ્રત્યગુદ્ભુતપિત્તસ્ય યથા બાહ્યાર્થપીતતા ।
ચૈતન્યં પ્રત્યગાત્મીયં બહિર્વદ્દૃશ્યતે તથા ॥ ૩૦॥

યસ્માદેવમતો વિશુદ્ધમવસીયતામ્ ।
પદાન્યુદ્ધૃત્ય વાક્યેભ્યો હ્યન્વયવ્યતિરેકતઃ ।
પદાર્થાંલ્લોકતો બુદ્ધ્વા વેત્તિ વાક્યાર્થમઞ્જસા ॥ ૩૧॥

કુતઃ પુનઃ સામાન્યમાત્રવૃત્તેઃ પદસ્ય

વાક્યાર્થપ્રતિપત્તિહેતુત્વમિતિ । બાઢમ્ ।
સામાન્યં હિ પદં બ્રૂતે વિશેષો વાક્યકર્તૃકઃ ।
શ્રુત્યાદિપ્રતિબદ્ધં સદ્વિશેષાર્થં ભવેત્પદમ્ ॥ ૩૨॥

અન્વયવ્યતિરેકપુરસ્સરં વાક્યમેવ
સામાનાધિકરણ્યાદિનાવિદ્યા-
પટલપ્રધ્વંસદ્વારેણ મુમુક્ષું સ્વારાજ્યેઽભિષેચયતિ ન
ત્વન્વયવ્યતિરેકમાત્રસાધ્યોઽયમર્થ ઇત્યાહ ।
બુદ્ધ્યાદીનામનાત્મત્વં લિઙ્ગાદપિ ચ સિધ્યતિ ।
નિવૃત્તિસ્તાવતા નેતીત્યતો વાક્યં સમાશ્રયેત્ ॥ ૩૩॥

ન કેવલમનુમાનમાત્રશરણોઽભિલષિતમર્થં ન
પ્રાપ્નોતીત્યનર્થં ચાપ્નોતીત્યાહ ।
અનાદૃત્ય શ્રુતિં મોહાદતો બૌદ્ધાસ્તમસ્વિનઃ ।
આપેદિરે નિરાત્મત્વમનુમાનૈકચક્ષુષઃ ॥ ૩૪॥

ન ચાનાદરે કારણમસ્તિ । યસ્માત્સર્વત્રૈવાનાદરનિમિત્તં
પ્રમાણસ્ય પ્રમાણાન્તરપ્રતિપન્નપ્રતિપાદનં વા
વિપરીતપ્રતિપાદનં વા સંશયિતપ્રતિપાદનં વા ન વા
પ્રતિપાદનમિતિ– ન ચૈતેષામન્યતમદપિ કારણમસ્તિ ।
યત આહ ।
માનાન્તરાનવષ્ટબ્ધં નિર્દુઃખ્યાત્માનમઞ્જસા ।
બોધયન્તી શ્રુતિઃ કેન ન પ્રમાણમિતીર્યતે ॥ ૩૫॥

ન ચ સંશયિતવ્યમવગમયતિ । યતઃ ।
સર્વસંશયહેતૌ હિ નિરસ્તે કથમાત્મનિ ।
જાયેત સંશયો વાક્યાદનુમાનેન યુષ્મદિ ॥ ૩૬॥

અપિ ચ ।
યત્ર સ્યાત્સંશયો નાસૌ જ્ઞેય આત્મેતિ પણ્ડિતૈઃ ।
ન યતઃ સંશયપ્રાપ્તિરાત્મનોઽવગતિત્વતઃ ॥ ૩૭॥

અનવબોધકત્વં તુ દૂરોત્સારિતમેવ । યત આહ ।
બોધેઽપ્યનુભવો યસ્ય ન કથંચન જાયતે ।
તં કથં બોધયેચ્છાસ્ત્રં લોષ્ટં નરસમાકૃતિમ્ ॥ ૩૮॥

અન્વયવ્યતિરેકપુરસ્સરં વાક્યમેવાવાક્યાર્થરૂપમાત્માનં

પ્રતિપાદયતીત્યસ્ય પક્ષસ્ય દ્રઢિમ્ને
શ્રુત્યુદાહરણમુપન્યસ્યતિ ।
જિઘ્રાણીમમહં ગન્ધમિતિ યો વેત્ત્યવિક્રિયઃ ।
સ આત્મા તત્પરં જ્યોતિઃ શિરસીદં વચઃ શ્રુતેઃ ॥ ૩૯॥

યથા "તત્સત્યં સ આત્મા તત્ત્વમસિ" ઇત્યસ્ય
શેષત્વેનાન્વયવ્યતિરેકશ્રુતિર્યથા "ય એષોઽક્ષિણિ
પુરુષો
દૃશ્યતે" ઇત્યાદ્યા "અથ યો વેદેદં જિઘ્રાણિ"
ઇત્યન્તા તથા "અહં બ્રહ્માસ્મિ" ઇત્યસ્ય શેષઃ ।
અહમઃ પ્રત્યગાત્માર્થો નિરસ્તાશેષયુષ્મદઃ ।
બમ્ભણીતિ શ્રુતિર્ન્યાય્યા યોઽયમિત્યાદિનાઽસકૃત્ ॥ ૪૦॥

કથં પુનરયમર્થોઽવસીયતે અહંવ્યાજેનાત્રાત્માર્થો
બુબોધયિષિત ઇતિ । યતઃ ।
એષ આત્મા સ્વયંજ્યોતી રવિસોમાગ્નિવાક્ષુ સઃ ।
ઇતેષ્વસ્તં દૃગેવાસ્તે ભાસયંચિત્તચેષ્ટિતમ્ ॥ ૪૧॥

નિર્ણેનેક્તિ ચ પૃષ્ટો મુનિઃ ।
આત્મનૈવેત્યુપશ્રુત્ય કોઽયમાત્મેત્યુદીરિતે ।
બુદ્ધેઃ પરં સ્વતોમુક્તમાત્માનં મુનિરભ્યધાત્ ॥ ૪૨॥

યસ્માચ્ચાત્માત્રાહંવ્યાજેન પ્રત્યઙ્માત્રો
જિગ્રાહયિષિતસ્તસ્માદહંવૃત્તિઃ સ્વરૂપસ્ય વિલયેનૈવ
વાક્યાર્થાવગમાય કારણત્વં પ્રતિપદ્યત ઇતીમમર્થમાહ ।
અહંવૃત્ત્યૈવ તદ્બ્રહ્મ યસ્માદેષોઽવગચ્છતિ ।
તત્સ્વરૂપલયેનાતઃ કારણં સ્યાદહંકૃતિઃ ॥ ૪૩॥

અત એવ ચ યઃ પ્રતિજ્ઞાતોઽર્થો "નાહંગ્રાહ્યે ન
તદ્ધીને" ઇત્યાદિઃ સ યુક્તિભિરુપપાદિત ઇતિ
કૃત્વોપસંહ્રિયતે ।
ગૃહીતાહમ્પદાર્થશ્ચેત્કસ્માજ્જ્ઞો ન પ્રપદ્યતે ।
પ્રત્યક્ષાદિવિરોધાચ્ચેત્પ્રતીચ્યુક્તિર્ન યુષ્મદિ ॥ ૪૪॥

પૂર્વસ્યૈવ શ્લોકાર્થસ્ય વિસ્પષ્ટાર્થમાહ ।
પરાઞ્ચ્યેવ તુ સર્વાણિ પ્રત્યક્ષાદીનિ નાત્મનિ ।

પ્રતીચ્યેવ પ્રવૃત્તં તત્સદસીતિ વચોઽઞ્જસા ॥ ૪૫॥

તસ્માત્પ્રમાતૃપ્રમાણપ્રમેયેભ્યો
હીયમાનોપાદીયમાનેભ્યોઽન્વયવ્યતિરેકાભ્યાં
મુઞ્જેષીકાવદશેષબુદ્ધિવિક્રિયાસાક્ષિતયાત્માનં
નિષ્કૃષ્ય તત્ત્વમસ્યાદિવાક્યેભ્યોઽપૂર્વાદિલક્ષણમાત્માનં
વિજાનીયાત્ । તદેતદાહ ।
અહં દુઃખી સુખી ચેતિ યેનાયં પ્રત્યયોઽધ્રુવઃ ।
અવગત્યન્ત આભાતિ સ મ આત્મેતિ વાક્યધીઃ ॥ ૪૬॥

પ્રમાણાન્તરાનવષ્ટબ્ધં નિરસ્તાશેષકાર્ય-
કારણાત્મકદ્વૈતપ્રપઞ્ચં સત્યજ્ઞાનાનન્દ-
લક્ષણમાત્માનં તત્ત્વમસ્યહમ્બ્રહ્માસ્મીત્યાદિવાક્યં
સંશયિતમિથ્યાજ્ઞાનાજ્ઞાનપ્રધ્વંસમુખેન
સાક્ષાદપરોક્ષાત્કરતલન્યસ્તામલકવત્પ્રતિપાદયત્યેવે-
ત્યસકૃદભિહિતમ્ । તત્ર કેચિદાહુઃ–તત્ત્વમસ્યાદિવાક્યૈ-
ર્યથાવસ્થિતવસ્તુયાથાત્મ્યાન્વાખ્યાનનિષ્ઠૈર્ન
યથોક્તોઽર્થઃ પ્રતિપત્તું શક્યતેઽભિધાશ્રુતિત્વાત્તેષામ્ ।
ન હિ લોકેઽભિધાશ્રુતેઃ પ્રમાણાન્તરનિરપેક્ષાયા
નદ્યાસ્તીરે ફલાનિ સન્તીત્યાદિકાયાઃ પ્રામાણ્યમભ્યુપગતમ્ ।
અતો નિયોગમુખેનૈવાભિધાશ્રુતેઃ પ્રામાણ્યં યુક્તં
પ્રમાણાન્તરનિરપેક્ષત્વાન્નિયોગસ્ય । અસ્ય પરિહારાર્થ-
મશેષપ્રત્યક્ષાદિપ્રમેયત્વનિરાકરણદ્વારેણાતીન્દ્રિયાર્થ-
વિષયત્વાદભિધાશ્રુતેઃ પ્રામાણ્યં સુપ્તપુરુષપ્રબોધક-
વાક્યસ્યેવ વક્તવ્યમિત્યયમારમ્ભઃ ।
નિત્યાવગતિરૂપત્વાદન્યમાનાનપેક્ષણાત્ ।
શબ્દાદિગુણહીનત્વાત્સંશયાનવતારતઃ ॥ ૪૭॥

તૃષ્ણાનિષ્ઠીવનૈર્નાત્મા પ્રત્યક્ષાદ્યઃ પ્રમીયતે ।
પ્રત્યગાત્મત્વહેતોશ્ચ સ્વાર્થત્વાદપ્રમેયતઃ ॥ ૪૮॥

શ્રુતિરપીમમર્થં નિર્વદતિ ।
દિદૃક્ષિતપરિછિન્નપરાગ્રૂપાદિસંશ્રયાત્ ।
વિપરીતમતો દૃષ્ટ્યા સ્વતોબુદ્ધં ન પશ્યતિ ॥ ૪૯॥

ન્યાયસિદ્ધમતો વક્તિ દૃષ્ટેર્દ્રષ્ટારમાત્મનઃ ।
ન પશ્યેત્પ્રત્યગાત્માનં પ્રમાણં શ્રુતિરાદરાત્ ॥ ૫૦॥

અનુમાનાવિષયત્વેઽન્યદપિ કારણમુચ્યતે ।
પ્રત્યક્ષસ્ય પરાક્ત્વાન્ન સમ્બન્ધગ્રહણં યતઃ ।
આત્મનોઽતોઽનુમિત્યાસ્યાનુભવો ન કથંચન ॥ ૫૧॥

એવમયં પ્રમાતૃપ્રમાણપ્રમેયવ્યવહારઃ સર્વ એવ
પરાચીનવિષય એવ ન પ્રતીચિનમાત્માનમવગાહયિતુમલમ્ ।
એવં ચ સત્યનેનૈવ યથોક્તોઽર્થોઽવસાતું શક્યત ઇત્યાહ ।
પ્રમાણવ્યવહારોઽયં સર્વ એવ પરાગ્યતઃ ।
સુવિચાર્યાપ્યતોઽનેન યુષ્મદ્યેવ દિદૃક્ષતે ॥ ૫૨॥

યસ્માલ્લૌકિકપ્રત્યક્ષાદિપ્રમાણાનધિગમ્યોઽહમ્બ્રહ્માસ્મીતિ
વાક્યાર્થસ્તસ્માત્ ।
અન્વયવ્યતિરેકાભ્યાં નિરસ્યાપ્રાણતો યતઃ ।
વીક્ષાપન્નસ્ય કોઽસ્મીતિ તદસીતિ શ્રુતિર્જગૌ ॥ ૫૩॥

સોઽયમન્વયવ્યતિરેકન્યાય એતાવાનેવ યદવસાનો વાક્યાર્થસ્ત-
દભિજ્ઞસ્યાહમ્બ્રહ્માસ્મીત્યાવિર્ભવતિ ।
દ્રષ્ટૃદૃશ્યવિભાગેનાગમાપાયિ-
સાક્ષિવિભાગેન ચ શ્રુત્યભ્યુપગમતઃ સંક્ષિપ્યોચ્યતે ।
દૃશ્યત્વાદ્ઘટવદ્દેહો દેહવચ્ચેન્દ્રિયાણ્યપિ ।
મનશ્ચેન્દ્રિયવજ્જ્ઞેયં મનોવન્નિશ્ચયાદિમત્ ॥ ૫૪॥

તથા સકલકાર્યકારણાગમાપાયિ વિભાગસાક્ષિત્વેનાપિ ।
પ્રાગસધ્ધાતિ પશ્ચાત્સત્સચ્ચ યાયાદસત્તથા ।
અનાત્માભિજનં તત્સ્યાદ્વિપરીતઃ સ્વયં દૃશિઃ ॥ ૫૫॥

તત્ર ઘટાદીનાં દૃશ્યાનામનાત્મત્વં દ્રષ્ટ્રાત્મપૂર્વકં
પ્રત્યક્ષેણૈવ પ્રમાણેનોપલભ્યાનાત્મનશ્ચાસાધારણાન્-
ધર્માનવધાર્ય તૈર્દૃશ્યત્વાગમાપાયાદિભિર્ધર્મૈઃ
શરીરેન્દ્રિયમનોનિશ્ચયાદિવૃત્તીરનાત્મતયા
વ્યુદસ્યાહંવૃત્તિમતોઽપિ દૃશ્યત્વાવિશેષાદ્દ્રષ્ટ્-
પૂર્વકત્વમવસીયતે । તદેતદાહ ।
ઘટાદયો યથા લિઙ્ગં સ્યુઃ પરમ્પરયાહમઃ ।

દૃશ્યત્વાદહમપ્યેવં લિઙ્ગં સ્યાદ્દ્રષ્ટુરાત્મનઃ ॥ ૫૬॥

નનુ દ્રષ્ટૃદર્શનદૃશ્યાનાં જાગ્રત્સ્વપ્નસુષુપ્તે-
ષ્વાગમાપાયદર્શનાદ્ધસાક્ષિકૌ તેષામાગમાપાયૌ સ
આગમાપાયવિભાગરહિત આત્મા યથા યન્નિબન્ધનૌ જગતઃ
પ્રકાશાપ્રકાશૌ સ પ્રકાશાપ્રકાશવિભાગરહિતઃ સૂર્ય
ઇતિ ।
યદા ચૈવં તદા વાક્યાવગમ્યસ્યાર્થસ્યાનુદિતાનસ્તમિત-
વિજ્ઞાનમાત્રસ્વભાવસ્યાનુમાનેનૈવ પ્રતિપન્નત્વાત્પુનરપિ
વાક્યસ્ય નિર્વિષયત્વપ્રસઙ્ગઃ । નૈષ દોષઃ ।
લિઙ્ગવ્યવધાનેન તત્પ્રતિપત્તેઃ । નનુ સાક્ષાદપરોક્ષા-
દાત્મસ્વભાવેનાનાત્મનો હાનોપાદાનયોઃ
સમ્બન્ધગ્રહણાત્કમતિશયં
વાક્યં કુર્યાત્ । મૈવં વોચઃ ।
લિઙ્ગાધીનત્વાત્તત્પ્રતિપત્તેઃ ।
ન હિ લિઙ્ગવ્યવધાનેનાત્મપ્રતિપત્તિઃ સાક્ષાત્પ્રતિપત્તિર્ભવતિ
"યમેવૈષ વૃણુતે તેન લભ્યઃ" ઇતિ શ્રુતેઃ । અત આહ ।
લિઙ્ગમસ્તિત્વનિષ્ઠત્વાન્ન સ્યાદ્વાક્યાર્થબોધકમ્ ।
સદસદ્વ્યુત્થિતાત્માઽયમતો વાક્યાત્પ્રતીયતે ॥ ૫૭॥

નનુ યદિ વ્યાવૃત્તસદસદ્વિકલ્પજાલં વસ્ત્વભીષ્ટં
વાક્યાદ્ભવતસ્તથાપિ તૂત્સાર્યતે વાક્યવિષયા
તૃષ્ણા–યસ્માદન્તરેણાપિ વાક્યશ્રવણં
નિરસ્તાશેષવિકલ્પમાગોપાલાવિપાલપણ્ડિતં સુષુપ્તે
વસ્તુ સિદ્ધમતો નાર્થો વાક્યશ્રવણેન । નૈતદેવમ્ ।
કિં કારણમ્ । સર્વાનર્થબીજસ્યાત્માનવબોધસ્ય
સુષુપ્તે સમ્ભવાત્ । યદિ હિ સુષુપ્તેઽજ્ઞાનં
નાભવિષ્યદન્તરેણાપિ વેદાન્તવાક્યશ્રવણમનન-
નિદિધ્યાસનાન્યહં બ્રહ્માસ્મીત્યધ્યવસાયાત્સર્વપ્રાણ-
ભૂતામપિ સ્વરસત એવ સુષુપ્તપ્રતિપત્તેઃ સકલસંસારો-
ચ્છિત્તિપ્રસઙ્ગઃ । ન ચ કૈવલ્યાત્પુનરુત્થાનં ન્યાય્ય-
મનિર્મોક્ષપ્રસઙ્ગાત્ । ન ચાન્ય એવ સુષુપ્તોઽન્ય
એવોત્થિત ઇતિ શક્યં વક્તું નાદ્રાક્ષમહં સુષુપ્તેઽન્યત્-

કિંચિદપીત્યુત્તિતસ્ય પ્રત્યભિજ્ઞાદર્શનાત્ । તસ્માદવશ્યં
સુષુપ્તેઽજ્ઞાનમભ્યુપગન્તવ્યમ્ । નનુ યદિ તત્રાજ્ઞાન-
મભવિષ્યદ્રાગદ્વેષઘટાજ્ઞાનાદિવત્પ્રત્યક્ષમભવિષ્ય-
દ્યથેહ લોકે ઘટં ન જાનામીત્યજ્ઞાનમવ્યવહિતં
પ્રત્યક્ષમ્ । અત્રોચ્યતે । ન । અભિવ્યઞ્જકાભાવાત્ ।
કથમભિવ્યઞ્જકાભાવ ઇતિ ચેચ્છૃણુ ।
બાહ્યાં વૃત્તિમનુત્પાદ્ય વ્યક્તિઃ સ્યાન્નાહમો યથા ।
નર્તેઽન્તઃકરણં તદ્વદ્ધ્વાન્તસ્ય વ્યક્તિરાઞ્જસી ॥ ૫૮॥

કશ્ચિદતિક્રાન્તં પ્રતિસ્મૃત્ય "દૃશ્યત્વાદહમપ્યેવં
લિઙ્ગં સ્યાદ્દ્રષ્ટુરાત્મનઃ" ઇતિ
નિર્યુક્તિકમભિહિતમિત્યાહ । કિં કારણમ્ ।
અહંતજ્જ્ઞાત્રોર્વિવેકાપ્રસિદ્ધેઃ । યથેહ
ઘટદેવદત્તયોર્ગ્રાહ્યગ્રાહકત્વેન સ્ફુટતરો વિભાગઃ પ્રસિદ્ધો
લોકે ન તથેહાહંકારતજ્જ્ઞાત્રોર્વિભાગોઽસ્તીતિ
તસ્માદસાધ્વેતદભિહિતમિતિ । અત્રોચ્યતે ।
દાહ્યદાહકતૈકત્ર યથા સ્યાદ્વહ્નિદારુણોઃ ।
જ્ઞેયજ્ઞાતૃકતૈવં સ્યાદહંજ્ઞાત્રોઃ પરસ્પરમ્ ॥ ૫૯॥

એવં તાવદવિદ્યોત્થસ્યાન્તઃકરણસ્ય બાહ્યવિષયનિમિત્ત-
રૂપાવચ્છેદાયાહંવૃત્તિર્વ્યાપ્રિયતે । તયાવચ્છિન્નં
સત્કૂટસ્થપ્રત્યગાત્મોપાદાનાવબોધરૂપસ્યાવ્યવધાનતયા
વિષયભાવં પ્રતિપદ્યત ઇતિ । તત્ર તયોર્જ્ઞાત્રહંતારૂપયો-
રવભાસકાવભાસ્યસમ્બન્ધવ્યતિરેકેણ નાન્યત્સમ્બન્ધાન્તર-
મુપપદ્યતે । અહંતારૂપં ત્વાત્મસાત્કૃત્વાઽહંકઞ્ચુકં
પરિધાયોપકાર્યત્વોપકારકત્વક્ષમઃ સન્ બાહ્યવિષયે-
ણોપકારિણાપકારિણા વાત્માત્મીયં સમ્બન્ધં પ્રતિપદ્યતે ।
તદભિધીયતે ।
ઇદં જ્ઞાનં ભવેજ્જ્ઞાતુર્મમજ્ઞાનં તથાહમઃ ।
અજ્ઞાનોપાધિનેદં સ્યાદ્વિક્રિયાતોઽહમો મમ ॥ ૬૦॥

એકસ્યૈવ જ્ઞાતુરન્તર્બાહ્યનિમિત્તભેદાદ્વિભિન્નેઽપિ
વિષય ઇદં મમેતિ જ્ઞાનં દ્વૈરૂપ્યં જાયત ઇત્યુક્તમ્ ।
અત્રોપક્રિયમાણાપક્રિયમાણસ્યૈવ જ્ઞાતુર્વિષયે

મમપ્રત્યયો ભવતિ વિપર્યયે ચેદમ્પ્રત્યય ઇતિ કથમવગમ્યતે ।
અવગમ્યતામન્વયવ્યતિરેકાભ્યામ્ । તત્કથમિત્યાહ ।
અનુપક્રિયમાણત્વાન્ન જ્ઞાતુઃ સ્યાદહં મમ ।
ઘટાદિવદિદં તુ સ્યાન્મોહમાત્રવ્યપાશ્રયાત્ ॥ ૬૧॥

મોહતત્કાર્યાશ્રયત્વાજ્જ્ઞાતૃત્વવિક્રિયયોઃ
પૂર્વત્રેદંમમજ્ઞાન્વયઃ પ્રદર્શિતઃ । અથાધુના તદ્વ્યતિરેકેણ
વ્યતિરેકપ્રદર્શનાર્થાહ ।
વિક્રિયાજ્ઞાનશૂન્યત્વાન્નેદં ન ચ મમાત્મનઃ ।
ઉત્થિતસ્ય સતોઽજ્ઞાનં નાહમજ્ઞાસિષં યતઃ ॥ ૬૨॥

આત્માનાત્મવિવેકસ્યેયત્તાપ્રદર્શનાર્થમાહ ।
વાક્યપ્રત્યક્ષમાનાભ્યામિયાનર્થઃ પ્રતીયતે ।
અનર્થકૃત્તમોહાનિર્વાક્યાદેવ સદાત્મનઃ ॥ ૬૩॥

દ્વિતીયાધ્યાયાદૌ શ્રોતૃચતુષ્ટયમુપન્યસ્તમ્ ।
તત્ર કૃત્સ્નાનાત્મનિવૃત્તૌ સત્યાં યઃ પ્રત્યગાત્મ-
ન્યવાક્યાર્થતાં પ્રતિપદ્યતે સ ક્ષપિતાશેષાન્તરાયહેતુરિતિ
ન તં પ્રતિ વક્તવ્યં કિંચિદપ્યવશિષ્યતે । યોઽપિ
વાક્યશ્રવણમાત્રાદેવ પ્રતિપદ્યતે તસ્યાપ્યતીન્દ્રિય-
શક્તિમત્ત્વાન્ન કિંચિદપ્યપેક્ષિતવ્યમસ્તિ । યશ્ચ
શ્રાવિતતત્ત્વમસ્યાદિવાક્યઃ સ્વયમેવાન્વયવ્યતિરેકો કૃત્વા
તદવસાન એવ વાક્યાર્થં પ્રતિપદ્યતેઽસાવપિ યથાર્થં
પ્રતિપન્ન ઇતિ પૂર્વવદેવોપેક્ષિતવ્યઃ ।
યઃ પુનરન્વયવ્યતિરેકૌ કારયિત્વાપિ પુનઃપુનર્વાક્યં શ્રાવ્યતે
યથાભૂતાર્થપ્રતિપત્તયે તસ્ય કૃતાન્વયવ્યતિરેકસ્ય સતઃ
કથં વાક્યં શ્રાવ્યત ઇતિ । ઉચ્યતે ।
નવસંખ્યાહૃતજ્ઞાનો દશમો વિભ્રમાદ્યથા ।
ન વેત્તિ દશમોઽસ્મીતિ વીક્ષમાણોઽપિ તાન્નવ ॥ ૬૪॥

અથ દૃષ્ટાન્તગતમર્થં દાર્ષ્ટાન્તિકાર્થે
સમર્પયિષ્યન્નાહ ।
અપવિદ્ધદ્વયોઽપ્યેવં તત્ત્વમસ્યાદિના વિના ।
વેત્તિ નૈકલમાત્માનં નાન્વેષ્યં ચાત્ર કારણમ્ ॥ ૬૫॥

નાન્વેષ્યં ચાત્ર કારણમિત્યુક્તં તત્કસ્માદિતિ ચોદિતે
પ્રત્યાહાન્વેષણાસહિષ્ણુત્વાત્ । તત્કથમિત્યાહ ।
સેયં ભ્રાન્તિર્નિરાલમ્બા સર્વન્યાયવિરોધિની ।
સહતે ન વિચારં સા તમો યદ્વદ્દિવાકરમ્ ॥ ૬૬॥

તસ્યાઃ ખલ્વસ્યા અવિદ્યાયા ભ્રાન્તેઃ સમ્યગ્જ્ઞાનોત્પત્તિદ્વારેણ
નિવૃત્તિઃ ।
બુભુત્સોચ્છેદિની ચાસ્ય સદસીત્યાદિના દૃઢમ્ ।
પ્રતીચિ પ્રતિપત્તિઃ સ્યાન્નાસૌ માનાન્તરાદ્ભવેત્ ॥ ૬૭॥

કથં પુનર્વાક્યં પ્રતિપાદયત્યેવેતિ ચેદ્ દૃષ્ટાન્તોક્તિઃ ।
જિજ્ઞાસોર્દશમં યદ્વન્નવાતિક્રમ્ય તામ્યતઃ ।
ત્વમેવ દશમોऽસીતિ કુર્યાદેવં પ્રમાં વચઃ ॥ ૬૮॥

સા ચ તત્ત્વમસ્યાદિવાક્યશ્રવણજા પ્રમોત્પન્નવાદેવ ।
ન ચ નૈવમિતિ પ્રત્યયાન્તર જાયતે । તદેતદૃષ્ટાન્તેન
પ્રતિપાદયતિ ।
દશમોऽસીતિ વાક્યોત્થા ન ધીરસ્ય વિહન્યતે ।
આદિમધ્યાવસાનેષુ ન નવસ્વસ્ય સંશયઃ ॥ ૬૯॥

એવં તત્ત્વમસીત્યસ્માદ્વૈતનુત્પ્રત્યગાત્મનિ ।
સમ્યગ્જ્ઞાતત્વમર્થસ્ય જાયેતૈવ પ્રમા દૃઢા ॥ ૭૦॥

પ્રત્યગાત્મનિ પ્રમોપજાયત ઇત્યુક્તં તત્ર ચોદ્યતે ।
કિં યથા ઘટાદિપ્રમેયવિષયા પ્રમા કર્ત્રાદિ-
કારકભેદાનપહ્નવેન જાયતે તથૈવોતાશેષકારક-
ગ્રામોપમર્દેન કર્તુઃ પ્રત્યગાત્મનીતિ । ઉચ્યતે ।
પ્રત્યક્તાસ્ય સ્વતોરૂપં નિષ્ક્રિયાકારકાફલમ્ ।
અદ્વિતીયં તદિદ્ધા ધીઃ પ્રત્યગાત્મેવ લક્ષ્યતે ॥ ૭૧॥

યસ્માદેવમ્ ।
વિપશ્ચિતોऽપ્યતસ્તસ્યામાત્મભાવં વિતન્વતે ।
દવીયસ્સ્વિન્દ્રિયાર્થેષુ ક્ષીયતે હ્યુત્તરોત્તરમ્ ॥ ૭૨॥

આહ । યદિ વાક્યમેવ યથાભૂતાર્થવબોધકમથ
કસ્ય હેતોરવિદ્યોત્થાપિતસ્ય કર્તૃત્વાદેરુપદેશ ઇત્યુક્તે
પ્રતિવિધીયતે ।

ભ્રાન્તિપ્રસિદ્ધ્યાનૂદ્યાર્થં તત્તત્વં ભ્રાન્તિબાધયા ।
અયં નેત્યુપદિશ્યેત તથૈવં તત્ત્વમિત્યપિ ॥ ૭૩॥

ઇમમર્થં દૃષ્ટાન્તેન બુદ્ધાવારોહયતિ ।
સ્થાણુઃ સ્થાણુરિતીવોક્તિર્ન નૃબુદ્ધિં નિરસ્યતિ ।
વ્યનુવાદાત્તથૈવોક્તિર્ભ્રાન્તિં પુંસો ન બાધતે ॥ ૭૪॥

યસ્માચ્છ્રોતૃપ્રસિદ્ધાનુવાદ્યેવ ત્વમિતિપદં
તસ્માદુદ્દિશ્યમાનસ્થત્વાદ્દુઃખિત્વાદેરવિવક્ષિતત્વમેવ ।
વિધીયમાનત્વે હિ સતિ વિરોધપ્રસઙ્ગો ન તુ વિધીયમાના-
નૂદ્યમાનયોરિતિ । સ્વપ્રધાનયોર્હિ પદયોર્વિરોધાશઙ્કા
સામાન્યલિઙ્ગતત્વાત્તયોર્ન વિપર્યયે ।
અનાલિઙ્ગિતસામાન્યૌ ન જિહાસિતવાદિનૌ ।
વ્યુત્થિતૌ તત્ત્વમૌ તસ્માદન્યોન્યાભિસમીક્ષણૌ ॥ ૭૫॥

અપાસ્તસામાન્યાર્થત્વાદનુવાદસ્થત્વાદ્વિધીયમાનેન
ચ સહ વિરોધાદ્દુઃખિત્વાદેરસ્તુ કામં જિહાસિતાર્થયો-
રસંસર્ગો યથોપન્યસ્તદોષવિરહાત્તત્ત્વમર્થયોઃ સંસર્ગોઽસ્તુ
નીલોત્પલવદિતિ ચેન્નૈવમપ્યુપપદ્યતે । તસ્માત્ ।
તદર્થયોસ્તુ નિષ્ઠાત્મા દ્વયપારોક્ષ્યવર્જિતઃ ।
નાદ્વિતીયં વિનાત્માનં નાત્મા નિત્યદૃશા વિના ॥ ૭૬॥

અત્રાહ । કિમિહ જિહાસિતં કિં વોપાદિત્સિતમિતિ । ઉચ્યતે ।
પ્રત્યગાત્માર્થાભિધાયિનસ્ત્વમ્પદાદુભયં પ્રતીયતેઽહં
દુઃખી પ્રત્યગાત્મા ચ । તત્ર ચ પ્રત્યગાત્મનોઽહં
દુઃખીત્યનેનાભિસમ્બન્ધ આત્મયાથાત્મ્યાનવબોધહેતુક
એવ । અતોઽહમર્થોઽપસૃષ્ટત્વાદજ્ઞાનોત્થત્વાચ્ચ હેય ઇતિ
પ્રત્યક્ષતોવસીયતે । તદર્થે કિં હેયં કિં વોપાદેયમિતિ
નાવધ્રિયતે । તત ઇદમભિધીયતે ।
પારોક્ષ્યં યત્તદર્થે સ્યાત્તદ્ધેયમહમર્થવત્ ।
પ્રતીચેવાહમોઽભેદઃ પારોક્ષ્યેણાત્મનોઽપિ મે ॥ ૭૭॥

કથં પુનસ્તદર્થોઽદ્વિતીયલક્ષણઃ પ્રત્યગાત્મોપાશ્રયં
સદ્વિતીયત્વં દુઃખિત્વં નિરન્વયમપનુદતીતિ । ઉચ્યતે । ન
ચૈતયોર્નિવર્તકનિવર્ત્યભાવં વયં બ્રૂમઃ । કથં તર્હિ ।

ત્વમર્થે પ્રત્યગાત્મનિ પ્રાગનવબુદ્ધાદ્વિતીયતા
સાનેનાવબોધ્યતે ।
અતોઽનવબોધનિરાસેન તદુત્થસ્ય સદ્વિતીયત્વસ્ય ત્વમર્થત્વસ્ય
પરોક્ષત્વસ્ય ચ તદર્થસ્થસ્ય નિરસનાન્ન વૈયધિકરણ્યાદિ-
ચોદ્યસ્યાવસરોઽસ્તીતિ । તદિદમભિધીયતે ।
તત્ત્વમર્થેન સમ્પૃક્તો નાનાત્વં વિનિવર્તયેત્ ।
નાપરિત્યક્તપારોક્ષ્યં ત્વં તદર્થં સિસૃપ્સતિ ॥ ૭૮॥

કસ્માત્પુનઃ કારણાત્તદર્થોઽદ્વિતીયલક્ષણસ્ત્વમર્થેન
પ્રત્યગાત્મના પૃથગર્થઃ સન્નવિદ્યોત્થં સદ્વિતીયત્વં
નિહન્તીતિ । ઉચ્યતે । વિરોધાત્ । તદુચ્યતે ।
સંસારિતાદ્વિતીયેન પારોક્ષ્યં ચાત્મના સહ ।
પ્રાસઙ્ગિકં વિરુદ્ધત્વાત્તત્ત્વમ્ભ્યાં બાધનં તયોઃ ॥ ૭૯॥

તત્ત્વમર્થયોસ્તુ બાધકત્વેઽન્યદપિ કારણમુચ્યતે ।
અજ્ઞાતપુરુષાર્થત્વાચ્છ્રૌતત્વાત્તત્ત્વમર્થયોઃ ।
સ્વમર્થમપરિત્યજ્ય બાધકૌ સ્તાં વિરુદ્ધયોઃ ॥ ૮૦॥

એવં તાવદ્યથોપક્રાન્તેન પ્રક્રિયાવર્ત્મના ન
પ્રત્યક્ષાદિપ્રમાણાન્તરૈર્વિરોધગન્ધોઽપિ સમ્ભાવ્યતે ।
યદા પુનઃ સર્વપ્રકારેણાપિ યતમાના નૈવેમં
વાક્યાર્થં સમ્ભાવયામઃ પ્રત્યક્ષાદિપ્રમાણાન્તરવિરોધત
એવ તસ્મિન્નપિ પક્ષ ઉચ્યતે ।
પ્રત્યક્ષાદિવિરુદ્ધં ચેદ્વાક્યમર્થં વદેત્ક્વચિત્ ।
સ્યાત્તુ તદ્દૃષ્ટિવિધ્યર્થં યોષાગ્નિવદસંશયમ્ ॥ ૮૧॥

યદા તુ તત્ત્વમસ્યાદિવાક્યં સર્વપ્રકારેણાપિ વિચાર્યમાણં
ન ક્રિયાં કટાક્ષેણાપિ વીક્ષતે તદા પ્રસંખ્યાનાદિવ્યાપારો
દુસ્સમ્ભાવ્ય ઇતિ । તદુચ્યતે ।
વસ્ત્વેકનિષ્ઠં વાક્યં ચેન્ન તસ્ય સ્યાત્ક્રિયાર્થતા ।
વસ્તુનો હ્યેકરૂપત્વાદ્વિકલ્પસ્યાપ્યસમ્ભવઃ ॥ ૮૨॥

ભિન્નવિષયત્વાચ્ચ ન પ્રમાણાન્તરવિરોધઃ । કથમ્ ।
ઉચ્યતે ।
અપૂર્વાધિગમં કુર્વત્પ્રમાણં સ્યાન્ન ચેન્ન તત્ ।

ન વિરોધસ્તતો યુક્તો વિભિન્નાર્થાવબોધિનોઃ ॥ ૮૩॥

ય એવમપિ ભિન્નવિષયાણાં વિરોધં વક્તિ સોઽત્રાપિ વિરોધં
બ્રૂયાત્ ।
નાયં શબ્દઃ કુતો યસ્માદ્રૂપં પશ્યામિ ચક્ષુષા ।
ઇતિ યદ્વત્તથૈવાયં વિરોધોઽક્ષજવાક્યયોઃ ॥ ૮૪॥

પ્રમાણાનાં સતાં ન વિરોધઃ શ્રોત્રાદીનામિવ
ભિન્નવિષયત્વાત્ ।
યયોશ્ચાભિન્નવિષયત્વં તયોરાખુનકુલયોરિવ પ્રતિનિયત એવ
બાધ્યબાધકભાવઃ સ્યાત્ । અતસ્તદુચ્યતે ।
પ્રત્યક્ષં ચેન્ન શાબ્દં સ્યાચ્છાબ્દં ચેદક્ષજં
કથમ્ ।
પ્રત્યક્ષાભાસઃ પ્રત્યક્ષે હ્યાગમાભાસ આગમે ॥ ૮૫॥

ન ચ પ્રતિજ્ઞાહેતુદૃષ્ટાન્તન્યાય ઇહ સમ્ભવતિ
શબ્દાદીનાં પ્રત્યેકં પ્રમાણત્વાદત આહ ।
સ્વમહિમ્ના પ્રમાણાનિ કુર્વન્ત્યર્થાવબોધનમ્ ।
ઇતરેતરસાચિવ્યે પ્રામાણ્યં નેષ્યતે સ્વતઃ ॥ ૮૬॥

ન ચ સુખદુઃખાદિસમ્બન્ધોઽવગત્યાત્મનઃ
પ્રત્યક્ષાદિપ્રમાણૈર્ગૃહ્યતે યેન વિરોધઃ
પ્રત્યક્ષાદિપ્રમાણૈરુદ્ભાટ્યતે ।
દુઃખિતાવગતિશ્ચેત્સ્યાન્ન પ્રમીયેત સાત્મવત્ ।
કર્મણ્યેવ પ્રમા ન્યાય્યા ન તુ કર્તર્યપિ ક્વચિત્ ॥ ૮૭॥

અભ્યુપગમેઽપિ ચ પ્રસંખ્યાનશતેનાપિ નૈવ ત્વં
સમ્ભાવિતદોષાન્મુચ્યતે । અત આહ ।
પ્રમાણબદ્ધમૂલત્વાદ્દુઃખિત્વં કેન વાર્યતે ।
અગ્ન્યુષ્ણવન્નિવૃત્તિશ્ચેન્નૈરાત્મ્યં હ્યેતિ સૌગતમ્ ॥ ૮૮॥

અથ મતમ્ ।
નિરાકુર્યાત્પ્રસંખ્યાનં દુઃખિત્વં ચેત્સ્વનુષ્ઠિતમ્ ।
પ્રત્યક્ષાદિવિરુદ્ધત્વાત્કથમુત્પાદયેત્પ્રમામ્ ॥ ૮૯॥

નનુ પ્રસંખ્યાનં નામ તત્ત્વમસ્યાદિશબ્દાર્થાન્વય-
વ્યતિરેકયુક્તિવિષયબુદ્ધ્યામ્રેડનમભિધીયતે

તચ્ચાનુષ્ઠીયમાનં પ્રમિતિવર્ધનયા પરિપૂર્ણાં
પ્રમિતિં જનયતિ ન પુનરૈકાગ્ર્યવર્ધનયેતિ ।
યથાશેષાશુચિનીડે સ્ત્રીકુણપે કામિનીતિ નિર્વસ્તુકઃ
પુરુષાયાસમાત્રજનિતઃ પ્રત્યય ઇતિ । તન્ન । યતઃ ।
અભ્યાસોપચયાદ્બુદ્ધેર્યત્સ્યાદૈકાગ્ર્યમેવ તત્ ।
ન હિ પ્રમાણાન્યભ્યાસાત્કુર્વન્ત્યર્થાવબોધનમ્ ॥ ૯૦॥

અભ્યાસોપચિતા કૃત્સ્નં ભાવના ચેન્નિવર્તયેત્ ।
નૈકાન્તિકી નિવૃત્તિસ્સ્યાદ્ભાવનાજં હિ તત્ફલમ્ ॥ ૯૧॥

અપિ ચાહ ।
દુઃખસ્મીત્યપિ ચેદ્ધ્વસ્તા કલ્પકોટ્યુપબૃંહિતા ।
સ્વલ્પીયોઽભ્યાસજાસ્થાસ્ન્વી ભાવનેત્યત્ર કા પ્રમા ॥ ૯૨॥

નનુ શાસ્ત્રાત્સ્થાસ્નુત્વં ભવિષ્યતિ । નૈવમ્ ।
યથાવસ્થિતવસ્તુયાથાત્મ્યાવબોધમાત્રકારિત્વાચ્છાસ્ત્રસ્ય ।
ન હિ પદાર્થશક્ત્યાધાનકૃચ્છાસ્ત્રમ્ । પ્રસિદ્ધં ચ
લોકે ।
ભાવનાજં ફલં યત્સ્યાદ્યચ્ચ સ્યાત્કર્મણઃ ફલમ્ ।
ન તત્સ્થાસ્ન્વિતિ મન્તવ્યં દ્રવિડેષ્વિવ સઙ્ગતમ્ ॥ ૯૩॥

યદ્યપિ પ્રત્યક્ષાદિપ્રમાણોપાતમાત્મનો દુઃખિત્વમ્ ।
તથાપિ તત્ત્વમસ્યાદિવાક્યોત્થપ્રત્યય એવ બલીયાનિતિ
નિશ્ચયોઽવ્યભિચારિપ્રામાણ્યવાક્યોપત્તત્વાત્પ્રમેયસ્ય
ચ સ્વત એવ નિર્દુઃખિત્વસિદ્ધેઃ । પ્રત્યક્ષાદેસ્તુ
વ્યભિચારિત્વા-
ત્સમ્ભાવનાયાશ્ચ પુરુષપરિકલ્પનામાત્રાવ-
ષ્ટમ્ભત્વાચ્ચેતિ ।
નિર્દુઃખિત્વં સ્વતસ્સિદ્ધં પ્રત્યક્ષાદેશ્ચ દુઃખિતા ।
કો હ્યાત્માનમનાદૃત્ય વિશ્વસેદ્બાહ્યમાનતઃ ॥ ૯૪॥

સમ્બન્ધાર્થ એવ ।
અપિ પ્રત્યક્ષબાધેન પ્રવૃત્તિઃ પ્રત્યગાત્મનિ ।
"પરાઞ્ચિ ખાનિ" ત્યેતસ્માદ્વચસો ગમ્યતે શ્રુતેઃ ॥ ૯૫॥

અભ્યુપગમ્યૈવમુચ્યતે ન તુ પ્રમાણં સત્પ્રમાણાન્તરેણ

વિરુધ્યત ઇત્યસકૃદવોચામ । યત્રાપિ
વાક્યપ્રત્યક્ષયોર્વિરોધાશઙ્કા
તત્રાપિ પુરુષમોહવશાદેવ સા જાયતે ન તુ પરમાર્થત ઇતિ ।
અત આહ ।
પ્રમાં ચેજ્જનયેદ્વાક્યં પ્રત્યક્ષાદિવિરોધિનીમ્ ।
ગૌણીં પ્રત્યક્ષતાં બ્રૂયાન્મુખ્યાર્થાસમ્ભવાદ્બુધઃ ॥ ૯૬॥

તસ્યાર્થસ્ય સુખપ્રતિપત્ત્યર્થમુદાહરણમ્ ।
અગ્નિસ્સમ્યગધીતેઽસૌ જહાસોચ્ચૈશ્ચ મઞ્ચકઃ ।
યથા તદ્વદહંવૃત્ત્યા લક્ષ્યતેઽનર્હયાપિ સઃ ॥ ૯૭॥

કસ્માત્પુનઃ કારણાત્સાક્ષાદેવાત્મા નાભિધીયતે કિમનયા
કલ્પનયેતિ તત્રાહ ।
ત્વમિત્યતદ્વિહાયાન્યન્ન વર્તાત્માવબોધતે ।
સમસ્તીહ ત્વમર્થોઽપિ ગુણલેશેન વર્તતે ॥ ૯૮॥

કસ્માત્પુનર્હેતોર્હ્યહમિત્યેતદપિ ગુણલેશેન વર્તતે ન પુનઃ
સાક્ષાદેવેતિ । વિધૂતસર્વકલ્પનાકારણસ્વાભાવ્યાદાત્મનઃ
અત આહ ।
વ્યોમ્નિ ધૂમતુષારાભ્રમલિનાનીવ દુર્ધિયઃ ।
કલ્પયેયુસ્તથા મૂઢાઃ સંસારં પ્રત્યગાત્મનિ ॥ ૯૯॥

નનુ સર્વકલ્પનાનામપ્યાત્મન્યત્યન્તાસમ્ભવે સમાનેઽહંવૃત્તૌ
કઃ પક્ષપાતે હેતુર્યેન વૃત્ત્યન્તરાણિ
વિધૂયાહંવૃત્ત્યૈવાત્મોપલક્ષ્યત ઇતિ । ઉચ્યતે ।
ચિન્નિભેયમહંવૃત્તિઃ પ્રતીચીવાત્મનોઽન્યતઃ ।
પૂર્વોક્તેભ્યશ્ચ હેતુભ્યસ્તસ્માદાત્માનયોચ્યતે ॥ ૧૦૦॥

વૃત્તિભિર્યુષ્મદર્થાભિર્લક્ષ્યતે ચેદ્દૃશિઃ પરઃ ।
અનાત્મત્વં ભવેત્તસ્ય વિતથં ચ વચઃ શ્રુતેઃ ॥ ૧૦૧॥

યથોક્તેન ।
અનેન ગુણલેશેન હ્યત્યહંકર્તૃકર્મયા ।
લક્ષ્યતેઽસાવહંવૃત્ત્યા નાઞ્જસાત્રાભિધીયતે ॥ ૧૦૨॥

નાઞ્જસાત્રાભિધીયત ઇતિ કો હેતુરિતિ ચેત્ ।
ષષ્ઠીગુણક્રિયાજાતિરૂઢયઃ શબ્દહેતવઃ ।

નાત્મન્યન્યતમોઽમીષાં તેનાત્મા નાભિધીયતે ॥ ૧૦૩॥

યદિ શબ્દોઽભિધાનાભિધેયત્વસમ્બન્ધાઙ્ગીકારેણ નાત્મનિ
વર્તતે કથં શબ્દાદહં બ્રહ્માસ્મીતિ સમ્યગ્બોધોત્પત્તિઃ ।
ઉચ્યતે ।
અસત્યે વર્ત્મનિ સ્થિત્વા નિરુપાયમુપેયતે ।
આત્મત્વકારણાદ્ધિમ્નો ગુણવૃત્ત્યા વિબોધિતાઃ ॥ ૧૦૪॥

કથં પુનરભિધાનમભિધેયેનાનભિસમ્બદ્ધં
સદનભિધેયેઽર્થે
પ્રમાં જનયતીતિ । શ‍ૃણુ યથાનભિસમ્બદ્ધમપ્યનભિધે-
યેઽર્થેઽવિદ્યાનિરાકરણમુખેન બોધયતીત્યાહ ।
શયાનાઃ પ્રાયશો લોકે બોધ્યમાનાઃ સ્વનામભિઃ ।
સહસૈવ પ્રબુધ્યન્તે યથૈવં પ્રત્યગાત્મનિ ॥ ૧૦૫॥

ન હિ નામ્નાસ્તિ સમ્બન્ધો વ્યુત્થિતસ્ય શરીરતઃ ।
તથાપિ બુધ્યતે તેન યથૈવં તત્ત્વમિત્યતઃ ॥ ૧૦૬॥

યથા ચ ।
બોધાબોધૌ નભોઽસ્પૃષ્ટ્વા કૃષ્ણધીનીડગૌ યથા ।
બાધ્યેતરાત્મકૌ સ્યાતાં તથેહાત્મનિ ગમ્યતામ્ ॥ ૧૦૭॥

"અસત્યે વર્ત્મનિ સ્થિત્વા" ઇત્યુપશ્રુત્યાતિવિસ્મિતો મહતા
સમ્ભ્રમેણ કશ્ચિચ્ચોદયતિ ।
નાસન્નુપાયો લોકેઽસ્તિ પરમાર્થવિનિશ્ચયે ।
નાસલ્લિઙ્ગાદ્ધિ બાષ્પદેઃ કશ્ચિદગ્નિં પ્રપદ્યતે ॥ ૧૦૮॥

ઇત્યેવં ચોદયેદ્યોઽપિ જોષયેત્તં ઘટાદિના ।
સદસદ્ભ્યાં વિભક્તોઽસૌ પર્યાયશ્ચ ન ચાનયોઃ ॥ ૧૦૯॥

એવં કુચોદ્યમુન્મૂલ્યાથેદાનીં પ્રકૃતમભિધીયતે ।
પ્રકૃતં
ચાનભિધેયે કથમભિધાશ્રુતિરવિદ્યાધ્વંસ્યાત્મનિ જ્ઞાનં
જનયતીતિ । તત્રૈવ કારણાન્તરમુચ્યતે ।
અતિદુસ્સ્થોઽપ્રબોધોઽત્ર હ્યાત્મૈવાસ્ય પ્રબુદ્ધતા ।
નિમિત્તમાત્રાપેક્ષેત્યેષા નાસાગ્રે બદરં યથા ॥ ૧૧૦॥

અનુદિતાનસ્તમિતકૂટસ્થબોધમાત્રસ્વાભાવ્યાદાત્મનો
દુસ્સમ્ભાવ્યોઽવિદ્યાસદ્ભાવ ઇતિ ચેન્ન । અવિદ્યાપ્રસિદ્ધ્યૈવ
તત્સદ્ભાવસિદ્ધેરુલૂકનિશાવદિત્યત ઇદમુચ્યતે ।
અહો ધાર્ષ્ટ્યમવિદ્યાયા ન કશ્ચિદતિવર્તતે ।
પ્રમાણં વસ્ત્વનાદૃત્ય પરમાત્મેવ તિષ્ઠતિ ॥ ૧૧૧॥

યસ્માદવિદ્યાપ્રસિદ્ધ્યૈવાવિદ્યાસદ્ભાવસિદ્ધિરત
આત્મવસ્તુવૃત્તાનુરોધેન ન કથંચનાપિ તત્સમ્ભાવનાપ્યસ્તિ
યત આહ ।
જ્ઞાનં યસ્ય નિજં રૂપં ક્રિયાકારકવર્જિતમ્ ।
સમ્ભાવનાપ્યવિદ્યાયાસ્તત્ર સ્યાત્કેન હેતુના ॥ ૧૧૨॥

સોઽયમેવમનુદિતાનસ્તમિતાવગતિમાત્રશરીર આત્માપિ
સન્નવિચારિતપ્રસિદ્ધાવિદ્યામાત્રવ્યવહિત એવાતથૈવેક્ષ્યતે
યતોઽતઃ ।
અનુમાનાદયં ભાવાદ્વ્યાવૃત્તોઽભાવમાશ્રિતઃ ।
તતોઽપ્યસ્ય નિવૃત્તિઃ સ્યાદ્વાક્યાદેવ બુભુત્સતઃ ॥ ૧૧૩॥

ન વ્યાવૃત્તિર્યથા ભાવાદ્ભાવેનૈવાવિશેષતઃ ।
અભાવાદપ્યભાવત્વાદ્વ્યાવૃત્તિર્ન તથેષ્યતે ॥ ૧૧૪॥

ભાવવદભાવાદપિ નિવૃત્તિરનુમાનાદેવ કિમિતિ ન ભવતીતિ
ચેચ્છૃણુ ।
યતો નાનુમાનેન વ્યાવિદ્ધાશેષક્રિયાકારકફલાત્મનિ
સ્વારાજ્યેઽભિષેક્તું શક્યતે તસ્માત્ ।
અવિદ્યાનિદ્રયા સોઽયં પ્રસુપ્તો દુર્વિવેકયા ।
ભાવાભાવવ્યુદાસિન્યા શ્રુત્યૈવ પ્રતિબોધ્યતે ॥ ૧૧૫॥

અત્રાહાનુદિતાનસ્તમિતવિજ્ઞાનાત્મમાત્રસ્વરૂપત્વાદ્દુસ્સમ્ભાવ્યા
અવિદ્યેતિ । નૈતદેવમ્ । કુતઃ । યત આહ ।
કુતો અવિદ્યેતિ ચોદ્યં સ્યાન્નૈવ પ્રાગ્ઘેત્વસમ્ભવાત્ ।
કાલત્રયાપરિચ્છિત્તેર્ન ચોર્ધ્વં ચોદ્યસમ્ભવઃ ॥ ૧૧૬॥

યસ્માત્તત્ત્વમસ્યાદિવાક્યમેવાત્મનોઽશેષામવિદ્યાં
નિરન્વયામપનુદતિ તસ્માત્ ।
અદ્ધાતમમનાદૃત્ય પ્રમાણં સદસીતિ યે ।

બુભુત્સન્તેઽન્યતઃ કુર્યુસ્તેઽક્ષ્ણાપિ રસવેદનમ્ ॥ ૧૧૭॥

એવમપ્રતિહતામહં બ્રહ્મેતિ પ્રમાં તત્ત્વમસ્યાદિવાક્યં
કુર્વદપિ ન પ્રતિપાદયતીતિ ચેદભિમતં ન કુતશ્ચનાપિ
પ્રતિપત્તિઃ સ્યાદત આહ ।
ઇદં ચેદનૃતં બ્રૂયાત્સત્યામવગતાવપિ ।
ન ચાન્યત્રાપિ વિશ્વાસો હ્યવગત્યવિશેષતઃ ॥ ૧૧૮॥

ન ચોપાદિત્સિતાદ્વાક્યાર્થાદ્વાક્યાર્થાન્તરં કલ્પયિતું
યુક્તમ્ । યસ્માત્ ।
ન ચેદનુભવોઽતઃ સ્યાત્પદાર્થાવગતાવપિ ।
કલ્પ્યં વિધ્યન્તરં તત્ર ન હ્યન્યોઽર્થોઽવગમ્યતે ॥ ૧૧૯॥

ન ચ યથાભિમતોઽર્થો યથોક્તેન ન્યાયેન નાવસીયતે ।
કોઽસૌ ન્યાય ઇત્યાહ ।
નામાદિભ્યો નિરાકૃત્ય ત્વમર્થં નિષ્પરિગ્રહઃ ।
નિસ્સ્પૃહો યુષ્મદર્થેભ્યઃ શમાદિવિધિચોદિતઃ ॥ ૧૨૦॥

ભઙ્ક્ત્વા ચાન્નમયાદીંસ્તાન્પઞ્ચાનાત્મતયાર્ગલાન્ ।
અહં બ્રહ્મેતિ વાક્યાર્થં વેત્તિ ચેન્નાર્થ ઈહયા ॥ ૧૨૧॥

ન ચેદેવમુપગમ્યતે વાક્યસ્ય પ્રમાણસ્ય સતોઽપ્રામાણ્યં
પ્રાપ્નોતિ । તદાહ ।
યદર્થં ચ પ્રવૃત્તં યદ્વાક્યં તત્ર ન ચેચ્છ્રુતમ્ ।
પ્રમામુત્પાદયેત્તસ્ય પ્રામાણ્યં કેન હેતુના ॥ ૧૨૨॥

અથ મન્યસે ।
જાનીયાચ્ચેત્પ્રસંખ્યાનાચ્છબ્દસ્સત્યવચાઃ કથમ્ ।
પારોક્ષ્યં શબ્દો નઃ પ્રાહ પ્રસંખ્યાનાત્ત્વસંશયમ્ ॥

૧૨૩॥

ન ચ યુક્તિશબ્દાવૃત્તિલક્ષણાત્પ્રસંખ્યાનાદ્યથાવ-
ત્પ્રતિપત્તિર્ભવિષ્યતીતિ સમ્ભાવયામઃ । યસ્માત્ ।
યુક્તિશબ્દૌ પુરાપ્યસ્ય ન ચેદકુરુતાં પ્રમામ્ ।
સાક્ષાદાવર્તનાત્તાભ્યાં કિમપૂર્વં ફલિષ્યતિ ॥ ૧૨૪॥

અથૈવમપિ પ્રસંખ્યાનમન્તરેણ પ્રાણાન્ધારયિતું ન

શક્નોષીતિ ચેચ્છ્રવણાદાવેવ સમ્પાદયિષ્યામઃ । કથમ્ ।
પ્રસંખ્યાને શ્રુતાવસ્ય ન્યાયોઽસ્ત્વામ્રેડનાત્મકઃ ।
ઈષચ્છ્રુતં સામિશ્રુતં સમ્યક્શ્રુત્વાવગચ્છતિ ॥ ૧૨૫॥

નનુ પ્રસંખ્યાનવિધિમનભ્યુપગચ્છતઃ પારમહંસી ચર્યા
બૌદ્ધાદિચર્યાવદશાસ્ત્રપૂર્વિકા પ્રાપ્નોતિ
તતશ્ચારૂઢપતિતત્વં
ન સ્યાદશેષકર્મણાં ચ નિવૃત્તિર્ન પ્રાપ્નોતીતિ । ઉચ્યતે ।
ત્વમર્થસ્યાવબોધાય વિધિરપ્યાશ્રિતો યતઃ ।
તમન્તરેણ યે દોષાસ્તેઽપિ નાયાન્ત્યહેતવઃ ॥ ૧૨૬॥

ઇતિ તૃતીયોઽધ્યાયઃ ॥ ૩॥

અથ ચતુર્થોઽધ્યાયઃ ।
પૂર્વાધ્યાયેષુ યદ્વસ્તુ વિસ્તરેણોદિતં સ્ફુટમ્ ।
સંક્ષેપતોઽધુના વક્ષ્યે તદેવ સુખવિત્તયે ॥ ૧॥

સંક્ષેપવિસ્તરાભ્યાં હિ મન્દોત્તમધિયાં નૃણામ્ ।
વસ્તૂચ્યમાનમેત્યન્તઃકરણં તેન ભણ્યતે ॥ ૨॥

આત્માનાત્મા ચ લોકેઽસ્મિન્પ્રત્યક્ષાદિપ્રમાણતઃ ।
સિદ્ધસ્તયોરનાત્મા તુ સર્વત્રૈવાત્મપૂર્વકઃ ॥ ૩॥

અનાત્મત્વં સ્વતસ્સિદ્ધં દેહાદ્ભિન્નસ્ય વસ્તુનઃ ।
જ્ઞાતુરપ્યાત્મતા તદ્વન્મધ્યે સંશયદર્શનમ્ ॥ ૪॥

અસાધારણાંસ્તયોર્ધર્માન્ જ્ઞાત્વા ધૂમાગ્નિવદ્બુધઃ ।
અનાત્મનોઽથ બુદ્ધ્યન્તાન્ જાનીયાદનુમાનતઃ ॥ ૫॥

ઇદમિત્યેવ બાહ્યેઽર્થે હ્યહમિત્યેવ બોદ્ધરિ ।
દ્વયં દૃષ્ટં યતો દેહે તેનાયં મુહ્યતે જનઃ ॥ ૬॥

કેન પુનર્ન્યાયેનાત્માનાત્મનોરશ્વમહિષયોરિવ વિભાગઃ
ક્રિયત ઇતિ । ઉચ્યતે ।
ન્યાયઃ પુરોદિતોઽસ્માભિરાત્માનાત્મવિભાગકૃત્ ।
તેનેદમર્થમુત્સાર્ય હ્યહમિત્યત્ર યો ભવેત્ ॥ ૭॥

વિદ્યાત્તત્ત્વમસીત્યસ્માદ્ભાવાભાવદૃશં સદા ।
અનન્તરમબાહ્યાર્થં પ્રત્યક્સ્થં મુનિરઞ્જસા ॥ ૮॥

ઉચ્યતાં તર્હિ કયા તુ પરિપાટ્યા વાક્યાર્થં વેત્તીતિ ।
ઉચ્યતે । અન્વયવ્યતિરેકાભ્યામ્ ।
ત્યક્તકૃત્સ્નેદમર્થત્વાત્ત્યક્તોઽહમિતિ મન્યતે ।
નાવગચ્છામ્યહં યસ્માન્નિજાત્માનમનાત્મનઃ ॥ ૯॥

અથ શરીરાદિબુદ્ધિપર્યન્તઃ સ સર્વોઽનાત્મૈવેતિ
પ્રમાણાદ્વિનિશ્ચિત્ય
કિમિતિ બુભુત્સાતો નોપરમતે । શ◌ૃણુ ।
અનુચ્છિન્નબુભુત્સશ્ચ પ્રત્યગ્ઘેતોરનાત્મનઃ ।
દોલાયમાનચિત્તોઽયં મુહ્યતે ભૌતવન્નરઃ ॥ ૧૦॥

અવિલુપ્તવિજ્ઞાનાત્મન આત્મત્વાદેવ નિત્યસાન્નિધ્યાદ્બુભુત્સુઃ
કિમિતિ ન પ્રતિપદ્યત ઇતિ। યસ્માત્ ।
યૈરદ્રાક્ષીત્પુરાત્માનં યમનાત્મેતિ વીક્ષતે ।
દૃષ્ટેર્દ્રષ્ટારમાત્માનં તૈઃ પ્રસિદ્ધૈઃ પ્રમિત્સતિ ॥ ૧૧॥

કસ્માત્પુનર્હેતોઃ પરાચીનાભિઃ શબ્દાદ્યવલેહિનીભિર્બુદ્ધિભિ-
રાત્માનમનાત્મવન્ન વીક્ષત ઇતિ । ઉચ્યતે ।
ચક્ષુર્ન વીક્ષતે શબ્દમતદાત્મત્વકારણાત્ ।
યથૈવં ભૌતિકી દૃષ્ટિર્નાત્માનં પરિપશ્યતિ ॥ ૧૨॥

પ્રત્યક્ષાદિપ્રમાણસ્વાભાવ્યાનુરોધેન
તાવત્તદદર્શનકારણમુક્તમ્ ।
અથ પ્રમેયસ્વાભાવ્યાનુરોધેન પ્રતિષેધ ઉચ્યતે ।
ધીવિક્રિયાસહસ્રાણાં હાનોપાદાનધર્મિણામ્ ।
સદા સાક્ષિણમાત્માનં પ્રત્યક્ત્વાન્નાહમીક્ષતે ॥ ૧૩॥

ક્વ પુનરિયં વિવેકબુદ્ધિઃ કિમાત્મન્યુતાનાત્મનીતિ । કિંચાતઃ ।
યદ્યાત્મનિ કૂટસ્થત્વવ્યાઘાતોઽનાત્મદર્શિત્વાત્ ।
અથાનાત્મનિ તસ્યાપ્યચૈતન્યાન્ન વિવેકસમ્બન્ધ ઇતિ । ઉચ્યતે ।
"દાહ્યદાહકતૈકત્ર" ઇત્યુક્તપરિહારાત્ ।
બુદ્ધાવેવ વિવેકોઽયં યદનાત્મતયા ભિદા ।
બુદ્ધિમેવોપમૃદ્નાતિ કદલીં તત્ફલં યથા ॥ ૧૪॥

સોઽયમતત્ત્વે તત્ત્વદૃક્ ।

અનુમાનપ્રદીપેન હિત્વા સર્વાનનાત્મનઃ ।
સંસારૈકાવલમ્બિન્યા તદભાવં ધિયેપ્સતિ ॥ ૧૫॥

યોઽયમન્વયવ્યતિરેકજો વિવેક આત્માનાત્મવિભાગ
લક્ષણોઽનાત્મસ્થઃ સ્થાણૌ સંશયાવબોધવત્-
પ્રતિપત્તવ્યોઽન્યથાવસ્તુસ્વાભાવ્યાન્મૃગતૃષ્ણિકોદક-
પ્રબોધવવદિત્યત આહ ।
સંસારબીજસંસ્થોઽયં તદ્ધિયા મુક્તિમિચ્છતિ ।
શશો નિમીલનેનેવ મૃત્યું પરિજિહીર્ષતિ ॥ ૧૬॥

અસ્યાર્થસ્ય દ્રઢિમ્ને શ્રુત્યુદાહરણમ્ ।
ઇમમર્થં પુરસ્કૃત્ય શ્રુત્યા સમ્યગુદાહૃતમ્ ।
"યચ્ચ"ક્ષુષેતિ વિસ્રબ્ધં" ન દૃષ્ટે" રિતિ
ચ સ્ફુટમ્ ॥ ૧૭॥

બુદ્ધ્યન્તમપવિદ્ધ્યૈવં કો ન્વહં સ્યામિતીઇક્ષિતુઃ ।
શ્રુતિસ્તત્ત્વમસીત્યાહ સર્વમાનાતિગામિની ॥ ૧૮॥

એષ સંક્ષેપતઃ પૂર્વાધ્યાયત્રયસ્યાર્થ ઉક્તઃ ।
સોઽયં ન્યાય્યોઽપિ વેદાન્તાર્થઃ શાસ્ત્રાચાર્યપ્રસાદ-
લભ્યોઽપ્યનપેક્ષિતશાસ્ત્રાચાર્યપ્રસાદોઽનન્યાપેક્ષ-
સિદ્ધસ્વભાવત્વાત્કૈશ્ચિચ્છ્રદ્ધધાનૈર્ન પ્રતીયતે ।
તેષાં સંગ્રહાર્થમભિમતપ્રામાણ્યોદાહરણમ્ ।
ભગવત્પૂજ્યપાદૈશ્ચ ઉદાહાર્યેવમેવ તુ ।
સુવિસ્પષ્ટોઽસ્મદુક્તોઽર્થઃ સર્વભૂતહિતૈષિભિઃ ॥ ૧૯॥

કિં પરમાત્મન ઉપદેશ ઉતાપરમાત્મન ઇતિ । કિં ચાતઃ ।
યદિ પરમાત્મનસ્તસ્યોપદેશમન્તરેણૈવ મુક્તત્વાન્નિરર્થક
ઉપદેશઃ । અથાપરમાત્મનસ્તસ્યાપિ સ્વત એવ સંસાર-
સ્વભાવત્વાન્નિષ્ફલ ઉપદેશઃ । એવમુભયત્રાપિ
દોષવત્ત્વાદત આહ ।
"અવિવિચ્યોભયં વક્તિ શ્રુતિશ્ચેત્સ્યાદ્ગ્રહસ્તથા" ।
ઇતિ પક્ષમુપાદાય પૂર્વપક્ષં નિશાત્ય ચ ॥ ૨૦॥

તચ્ચેદમવિવેકાત્સ્વતો વિવિક્તાત્મને તત્ત્વમસીત્યુપદિષ્ટમ્ ।
યુષ્મદસ્મદ્વિભાગજ્ઞે સ્યાદર્થવદિદં વચઃ ।

યતોઽનભિજ્ઞે વાક્યં સ્યાદ્બધિરેષ્વિવ ગાયનમ્ ॥ ૨૧॥

તસ્ય ચ યુષ્મદસ્મદ્વિભાગવિજ્ઞાનસ્ય કા યુક્તિરુપાયભાવં
પ્રતિપદ્યતે । શૃણુ ।
"અન્વયવ્યતિરેકૌ હિ પદાર્થસ્ય પદસ્ય ચ ।
સ્યાદેતદહમિત્યત્ર યુક્તિરેવાવધારણમ્" ॥ ૨૨॥

કથં તૌ યુક્તિરિત્યત્રાહ ।
"નાદ્રાક્ષમહમિત્યસ્મિન્ સુષુપ્તેઽન્યન્મનાગપિ ।
ન વારયતિ દૃષ્ટિં સ્વાં પ્રત્યયં તુ નિષેધતિ" ॥ ૨૩॥
"એવં વિજ્ઞાતવાક્યાર્થે શ્રુતિલોકપ્રસિદ્ધિતઃ ।
શ્રુતિસ્તત્ત્વમસીત્યાહ શ્રોતુર્મોહાપનુત્તયે" ॥ ૨૪॥

તત્ર ત્વમિતિ પદં યત્ર લક્ષણયા વર્તતે સોઽર્થ ઉચ્યતે ।
"અહં શબ્દસ્ય યા નિષ્ઠા જ્યોતિષિ પ્રત્યગાત્મનિ ।
સૈવોક્તા સદસીત્યેવં ફલં તત્ર વિમુક્તતા" ॥ ૨૫॥

અન્યચ્ચાન્વયવ્યતિરેકોદાહરણમ્ । તથા ।
"છિત્ત્વા ત્યક્તેન હસ્તેન સ્વયં નાત્મા વિશેષ્યતે ।
તથા શિષ્ટેન સર્વેણ યેનયેન વિશેષ્યતે ॥ ૨૬॥

વિશેષણમિદં સર્વં સાધ્વલંકરણં યથા ।
અવિદ્યાધ્યસ્તમતઃ સર્વં જ્ઞાત આત્મન્યસદ્ભવેત્ ॥ ૨૭॥

તસ્માત્ત્યક્તેન હસ્તેન તુલ્યં સર્વં વિશેષણમ્ ।
અનાત્મત્વેન તસ્માજ્જ્ઞો મુક્તઃ સર્વવિશેષણૈઃ ॥ ૨૮॥

જ્ઞાતૈવાત્મા સદા ગ્રાહ્યો જ્ઞેયમુત્સૃજ્ય કેવલઃ ।
અહમિત્યપિ યદ્ગ્રાહ્યં વ્યપેતાઙ્ગસમં હિ તત્" ॥ ૨૯॥
"દૃશ્યત્વાદહમિત્યેષ નાત્મધર્મો ઘટાદિવત્ ।
તથાન્યે પ્રત્યયા જ્ઞેયા દોષાશ્ચાત્મામલો હ્યતઃ" ॥ ૩૦॥

સર્વન્યાયોપસંગ્રહઃ ।
"નિત્યમુક્તત્વવિજ્ઞાનં વાક્યાદ્ભવતિ નાન્યતઃ ।
વાક્યાર્થસ્યાપિ વિજ્ઞાનં પદાર્થસ્મૃતિપૂર્વકમ્ ॥ ૩૧॥

અન્વયવ્યતિરેકાભ્યાં પદાર્થસ્સ્મર્યતે ધ્રુવમ્ ।

એવં નિર્દુઃખમાત્માનમક્રિયં પ્રતિપદ્યતે ॥ ૩૨॥

સદેવેત્યાદિવાક્યેભ્યઃ પ્રમા સ્ફુટતરા ભવેત્ ।
દશમસ્ત્વમસીત્યસ્માદ્યથૈવં પ્રત્યગાત્મનિ ॥ ૩૩॥

વીક્ષાપન્નસ્યોદાહરણમ્ ।
નવબુદ્ધ્યપહારાદ્ધિ સ્વાત્માનં દશપૂરણમ્ ।
અપશ્યન્ જ્ઞાતુમેવેચ્છેત્સ્વમાત્માનં જનસ્તથા ॥ ૩૪॥

અવિદ્યાબદ્ધચક્ષુષ્ટ્વાત્કામાપહૃતધીઃ સદા ।
વિવિક્તં દૃશિમાત્માનં નેક્ષતે દશમં યથા ॥ ૩૫॥

સોઽયમેવમવિદ્યાપટલાવગુણ્ઠિતદૃષ્ટિઃ સન્
કથમુત્થાપ્યત ઇત્યાહ ।
યથા સ્વાપનિમિત્તેન સ્વપ્નદૃક્પ્રતિબોધિતઃ ।
કરણં કર્મ કર્તારં સ્વાપ્નં નૈવેક્ષતે સ્વતઃ ॥ ૩૬॥

અનાત્મજ્ઞસ્તથૈવાયં સમ્યક્ શ્રુત્યાવબોધિતઃ ।
ગુરું શાસ્ત્રં તથા મૂઢં સ્વાત્મનોઽન્યં ન પશ્યતિ ॥ ૩૭॥

સ કિં સકલસંસારપ્રવિવિક્તમાત્માનં વાક્યાત્પ્રતિપદ્યત
ઉત નેતીતિ । અત્ર બ્રૂમઃ । કૂટસ્થાવગતિશેષમાત્રત્વા-
ત્પ્રતિપત્તેરત આહ ।
દણ્ડાવસાનનિષ્ઠસ્સ્યાદ્દણ્ડસર્પો યથા તથા ।
નિત્યાવગતિનિષ્ઠં સ્યાદ્વાક્યાજ્જગદસંશયમ્ ॥ ૩૮॥

કુત એતત્ । યસ્માત્ ।
પશ્યન્નિતિ યદાહોચ્ચૈઃ પ્રત્યક્ત્વમજમવ્યયમ્ ।
અપૂર્વાનપરાનન્તં ત્વમા તદુપલક્ષ્યતે ॥ ૩૯॥

તત્ત્વમસ્યાદિવાક્યોત્થવિજ્ઞાનૈવ બાધ્યતે । યસ્માત્ ।
અસ્માદ્યદપરં રૂપં નાસ્તીત્યેવ નિરૂપ્યતે ।
અન્યથાગ્રહણાભાવાદ્બીજં તત્સ્વપ્નબોધયોઃ ॥ ૪૦॥

અસ્યાર્થસ્ય દ્રઢિમ્ન ઉદાહરણમ્ ।
કાર્યકારણબદ્ધૌ તાવિષ્યેતે વિશ્વતૈજસૌ ।
પ્રાજ્ઞઃ કારણબદ્ધસ્તુ દ્વૌ તૌ તુર્યે ન સિધ્યતઃ ॥ ૪૧॥

"અન્યથાગૃહ્ણતઃ સ્વપ્નો નિદ્રા તત્ત્વમજાનતઃ ।
વિપર્યાસે તયોઃ ક્ષીણે તુરીયં પદમશ્નુતે" ॥ ૪૨॥

તથા ભગવત્પાદીયમુદાહરણમ્ ।
"સુષુપ્તાખ્યં તમોઽજ્ઞાનં બીજં સ્વપ્નપ્રબોધયોઃ ।
આત્મબોધપ્રદગ્ધં સ્યાદ્બીજં દગ્ધં યથાભવમ્" ॥

૪૩॥

એવં ગૌડૈર્દ્રાવિડૈર્નઃ પૂજ્યૈરયમર્થઃ પ્રભાષિતઃ ।
અજ્ઞાનમાત્રોપાધિસ્સન્નહમાદિદૃગીશ્વરઃ ॥ ૪૪॥

તત્રાન્યથાગ્રહણવદન્યથાગ્રહણબીજમગ્રહણમનાત્મધર્મ
એવેત્યાહ ।
ઇદં જ્ઞાનમહં જ્ઞાતા જ્ઞેયમેતદિતિ ત્રયમ્ ।
યોઽવિકારો વિજાનાતિ પરાગેવાસ્ય તત્તમઃ ॥ ૪૫॥

યત એતદેવમતસ્તસ્યૈવ
બીજાત્મનસ્તમસશ્ચિત્તધર્મવિશિષ્ટસ્ય
સ્વકાર્યદ્વિતીયાભિસમ્બન્ધો ન ત્વવિકારિણ આત્મન ઇત્યાહ
દૃષ્ટાન્તેન ।
રૂપપ્રકાશયોર્યદ્વત્સંગતિર્વિક્રિયાવતઃ ।
સુખદુઃખાદિસમ્બન્ધશ્ચિત્તસ્યૈવં વિકારિણઃ ॥ ૪૬॥

તદેતદન્વયવ્યતિરેકાભ્યાં દર્શયિષ્યન્નાહ ।
સમ્પ્રસાદેઽવિકારિત્વાદસ્તં યાતે વિકારિણિ ।
પશ્યતો નાત્મનઃ કિંચિદ્દ્વિતીયં સ્પૃશતેઽણ્વપિ ॥ ૪૭॥

સોઽયં કૂટસ્થજ્ઞાનમૂર્તિરાત્મા ।
યથા પ્રાજ્ઞે તથૈવાયં સ્વપ્નજાગરિતાન્તયોઃ ।
પશ્યન્નપ્યવિકારિત્વાદ્દ્વિતીયં ન પશ્યતિ ॥ ૪૮॥

એવં જ્ઞાનવતો નાસ્તિ મમાહંમતિસંશ્રયઃ ।
ભાસ્વત્પ્રદીપહસ્તસ્ય હ્યન્ધકાર ઇવાગ્રતઃ ॥ ૪૯॥

તત્ર દૃષ્ટાન્તઃ ।
આ પ્રબોધાદ્યથાસિદ્ધિર્દ્વૈતાદન્યસ્ય વસ્તુનઃ ।

બોધાદેવમસિદ્ધત્વં બુદ્ધ્યાદેઃ પ્રત્યગાત્મનઃ ॥ ૫૦॥

સ એષ વિદ્વાન્હાનોપાદાનશૂન્યમાત્માનમાત્મનિ પશ્યન્ ।
સર્વમેવાનુજાનાતિ સર્વમેવ નિષેધતિ ।
ભેદાત્મલાભોઽનુજ્ઞા સ્યાન્નિષેધોઽતત્સ્વભાવતઃ ॥ ૫૧॥

સર્વસ્યોક્તત્વાદુપસંહારઃ ।
પરમાથાર્થનિષ્ઠં યત્સર્વવેદાન્તનિશ્ચિતમ્ ।
તમોપનુદ્ધિયાં જ્ઞાનં તદેતત્કથિતં મયા ॥ ૫૨॥

એતાવદિહોક્તમ્ ।
નેહાત્મવિન્મદન્યોઽસ્તિ ન મત્તોઽજ્ઞોઽસ્તિ કશ્ચન ।
ઇત્યજાનન્વિજાનાતિ યસ્સ બ્રહ્મવિદુત્તમઃ ॥ ૫૩॥

એવમાત્માનં જ્ઞાત્વા કિં પ્રવર્તિતવ્યમુત નિવર્તિતવ્યમાહોસ્વિ-
ન્મુક્તપ્રગ્રહતેતિ । ઉચ્યતે ।
જ્ઞેયાભિન્નમિદં યસ્માજ્જ્ઞેયવસ્ત્વનુસાર્યતઃ ।
ન પ્રવૃત્તિં નિવૃત્તિં વા કટાક્ષેણાપિ વીક્ષતે ॥ ૫૪॥

કુત એતજ્જ્ઞેયાભિન્નમિતિ । યતઃ ।
પ્રાગાત્મબોધાદ્બોધોઽયં બાહ્યવસ્તૂપસર્જનઃ ।
પ્રધ્વસ્તાખિલસંસાર આત્મૈકાલમ્બનઃ શ્રુતેઃ ॥ ૫૫॥

એવમવગતપરમાર્થતત્ત્વસ્ય ન શેષશેષિભાવ-
સ્તત્કારણસ્યોત્સારિતત્વાદિત્યાહ ।
વાસ્તવેનૈવ વૃત્તેન નિરુણદ્ધિ યતો ભવમ્ ।
નિવૃત્તિમપિ મૃદ્નાતિ સમ્યગ્બોધઃ પ્રવૃત્તિવત્ ॥ ૫૬॥

સકૃદાત્મપ્રસૂત્યૈવ નિરુણદ્ધ્યખિલં ભવમ્ ।
ધ્વાન્તમાત્રનિરાસેન ન તતોઽન્યાન્યથામતિઃ ॥ ૫૭॥

દેશકાલાદ્યસમ્બદ્ધાદ્દેશાદેર્મોહકાર્યતઃ ।
નાનુત્પન્નમદગ્ધં વા જ્ઞાનમજ્ઞાનમસ્ત્યતઃ ॥ ૫૮॥

સમ્યગ્જ્ઞાનશિખિપ્લુષ્ટમોહતત્કાર્યરૂપિણઃ ।
સકૃન્નિવૃત્તેર્બાધ્યસ્ય કિં કાર્યમવશિષ્યતે ॥ ૫૯॥

વાસ્તવેનૈવ વૃત્તેનાવિદ્યાયાઃ પ્રધ્વસ્તત્વાન્ન
કિંચિદવશિષ્યત ઇત્યુક્તઃ પરિહારઃ । અથાપરસ્સામ્પ્રદાયિકઃ

પરિહારઃ ।
નિવૃત્તસર્પસ્સર્પોત્થં યથા કમ્પં ન મુઞ્ચતિ ।
વિધ્વસ્તાખિલમોહોઽપિ મોહકાર્યં તથાત્મવિત્ ॥ ૬૦॥

યતઃ પ્રવૃત્તિબીજમુચ્છિન્નં તસ્માત્ ।
તરોરુત્ખાતમૂલસ્ય શોષેણૈવ યથા ક્ષયઃ ।
તથા બુદ્ધાત્મતત્ત્વસ્ય નિવૃત્ત્યૈવ તનુક્ષયઃ ॥ ૬૧॥

અથાલેપકપક્ષનિરાસાર્થમાહ ।
બુદ્ધદ્વૈતસત્ત્વસ્ય યથેષ્ટાચરણં યદિ ।
શુનાં તત્ત્વદૃશાં ચૈવ કો ભેદોઽશુચિભક્ષણે ॥ ૬૨॥

કસ્માન્ન ભવતિ । યસ્માત્ ।
અધર્માજ્જાયતેઽજ્ઞાનં યથેષ્ટાચરણં તતઃ ।
ધર્મકાર્યે કથં તત્સ્યાદ્યત્ર ધર્મોઽપિ નેષ્યતે ॥ ૬૩॥

"પ્રત્યાચક્ષાણ આહાતો" "યથેષ્ટાચરણં" હરિઃ ।
યસ્ય સર્વે સમારમ્ભાઃ પ્રકાશં ચે તિ
સર્વદૃક્ ॥ ૬૪॥

તિષ્ઠતુ તાવત્સર્વપ્રવૃત્તિબીજઘસ્મરં જ્ઞાનં
મુમુક્ષ્વવસ્થાયામપિ ન સમ્ભવતિ યથેષ્ટાચરણમ્ ।
તદાહ ।
" યો હિ યત્ર વિરક્તઃ સ્યાન્નાસૌ તસ્મૈ પ્રવર્તતે ।
લોકત્રયવિરક્તત્વાન્મુમુક્ષુઃ કિમિતીહતે" ॥ ૬૫॥

તત્ર દૃષ્ટાન્તઃ ।
"ક્ષુધયા પીડ્યમાનોઽપિ ન વિષં હ્યત્તુમિચ્છતિ ।
મિષ્ટાન્નધ્વસ્તતૃડ્ જાનન્નામૂઢસ્તજ્જિઘત્સતિ" ॥ ૬૬॥

યતોઽવગતપરમાર્થતત્ત્વસ્ય યથેષ્ટાચરણં ન મનાગપિ
ઘટતે મુમુક્ષુત્વેઽપિ ચ તસ્માત્ ।
રાગો લિઙ્ગમબોધસ્ય ચિત્તવ્યાયામભૂમિષુ ।
કુતઃ શાડ્વલતા તસ્ય યસ્યાગ્નિઃ કોટરે તરોઃ ॥ ૬૭॥

સકલપુરુષાર્થસમાપ્તિકારિણોઽસ્યાત્માવબોધસ્ય કુતઃ
પ્રસૂતિરિતિ । ઉચ્યતે ।

અમાનિત્વાદિનિષ્ઠો યો યશ્ચાદ્વેષ્ટ્રાદિસાધનઃ ।
જ્ઞાનમુત્પદ્યતે તસ્ય ન બહિર્મુખચેતસઃ ॥ ૬૮॥

ઉત્પન્ન આત્મવિજ્ઞાને કિમવિદ્યાકાર્યત્વાત્પ્રવૃત્તિવન્નિવૃત્ત્યા-
ત્મકામાનિત્વદયો નિવર્તન્ત ઉત નેતિ । નેતિ બ્રૂમઃ । કિં
કારણમ્ । નિવૃત્તિશાસ્ત્રાવિરુદ્ધસ્વાભાવ્યાત્પરમાત્મનો
ન તુ નિયોગવશાત્ । કથં તર્હિ । શ‍ૃણુ ।
ઉત્પન્નાત્મપ્રબોધસ્ય ત્વદ્વેષ્ટૃત્વાદયો ગુણાઃ ।
અયત્નતો ભવન્ત્યસ્ય ન તુ સાધનરૂપિણઃ ॥ ૬૯॥

યત એતદેવમતઃ ।
ઇમાં ગ્રન્થમુપાદિત્સુરમાનિત્વાદિસાધનઃ ।
યત્નતઃ સ્યાન્ન દુર્વૃત્તઃ પ્રત્યગ્ધર્માનુગો હ્યયમ્ ॥ ૭૦॥

ન દાતવ્યશ્ચાયં ગ્રન્થઃ ।
નાવિરક્તાય સંસારાન્નાનિરસ્તૈષણાય ચ ।
ન ચાયમવતે દેયં વેદાન્તાર્થપ્રવેશનમ્ ॥ ૭૧॥

જ્ઞાત્વા યથોદિતં સમ્યગ્જ્ઞાતવ્યં નાવશિષ્યતે ।
ન ચાનિરસ્તકર્મેદં જાનીયાદઞ્જસા તતઃ ॥ ૭૨॥

નિરસ્તસર્વકર્માણઃ પ્રત્યક્પ્રવણબુદ્ધયઃ ।
નિષ્કામા યતયઃ શાન્તા જાનન્તીદં યથોદિતમ્ ॥ ૭૩॥

શ્રીમચ્છઙ્કરપાદપદ્મયુગલં સંસેવ્ય લબ્ધ્વોચિવાન્
  જ્ઞાનં પારમહંસ્યમેતદમલં સ્વાન્તાન્ધકારાપનુત્ ।
મા ભૂદત્ર વિરોધિની મતિરતઃ સદ્ભિઃ પરીક્ષ્યં બુધૈઃ
  સર્વત્રૈવ વિશુદ્ધયે મતમિદં સન્તઃ પરં કારણમ્ ॥

૭૪॥

સુભાષિતં ચાર્વપિ નામહાત્મનાં
    દિવાકરો નક્તદૃશામિવામલઃ ।
પ્રભાતિ ભાત્યેવ વિશુદ્ધચેતસાં
    નિધિર્યથાપાસ્તતૃષાં મહાધનઃ ॥ ૭૫॥

વિષ્ણોઃ પાદાનુગાં યાં નિખિલભવનુદં શંકરોઽવાપ
યોગાત્

સર્વજ્ઞં બ્રહ્મસંસ્થં મુનિગણસહિતં સમ્યગભ્યર્ચ્ય
ભક્ત્યા ।
વિદ્યાં ગઙ્ગામિવાહં પ્રવરગુણનિધેઃ પ્રાપ્ય વેદાન્તદીપ્તાં
કારુણ્યાત્તામવોચં જનિમૃતિનિવહધ્વસ્તયે દુઃખિતેભ્યઃ ॥ ૭૬॥

વેદાન્તોદરવર્તિ ભાસ્વદમલં ધ્વાન્તચ્છિદસ્મદ્ધિયો
દિવ્યં જ્ઞાનમતીન્દ્રિયેઽપિવિષયે વ્યાહન્યતે ન ક્વચિત્ ।
યો નો ન્યાયશલાકયૈવ નિખિલં સંસારબીજં તમઃ
પ્રોત્સાર્યાવિરકાર્ષીદ્ગુરુગુરુઃ પૂજ્યાય તસ્મૈ નમઃ ॥ ૭૭॥

સમ્બન્ધોક્તિરિયં સાધ્વી પ્રતિશ્લોકમુદાહૃતા ।
નૈષ્કર્મ્યસિદ્ધેર્જ્ઞાત્વેમાં વ્યાખ્યાતાસૌ ભવેદ્ધ્રુવમ્
॥ ૭૮॥

ઇતિ ચતુર્થોઽધ્યાયઃ ॥ ૪॥

ઇતિ ।

Encoded and proofread by Sunder Hattangadi

*Naishkarmyasidhi*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*